लितं इतीपि मंदोक्तिरयुक्तेति बोध्यं। तथा च तद्धात्वर्थप्रयोज्यफलाश्रयोऽपादानमिति तत्सूत्रार्थ इति बोध्यं। एष एव चान्तर्ति विघातपदेनोच्यते इति भावः
नन्वीप्सिततमशब्दस्याभिप्रेतपर्यायस्य रूढस्य तत्र ग्रहणे तपवादानां स्वत्वे सति ईप्सिततत्वेन तत्रैव तत्प्राप्तिर्नतु गवादेः स्वत्वे तु तत्रैव तत्त्वेन तत्प्राप्तिरिति

२५

थमुभयत्र युगपत्तत्तदापादनमत आह। तत्रापीति॥ वारणार्थानामिति सूत्रेपी स्यर्थः। अत एव कूपादंधंनिषेधो कूपादेरपादानत्वं। अन्यथा राज्ञा धर्म मयादिलो मायादीनांना
शाभावरूपफलाश्रयत्वेन गोस्वाम्यभिप्रेतत्वेपि अस्यातत्वात्तत्त्वस्यात्। नच संयोगो नत कर्तृव्यापारजन्य इति तत्र कर्मत्वाप्राप्तिरिति वाच्यं कर्तृव्यापारवाचक धातूपा
त फलाश्रयत्व मित्यर्थस्यैव तेन लाभात् फलस्य तत्तद्धात्वर्थत्व पर्यंते नाग्रहात् अपिना प्रकृतसूत्रसमुच्चयः तच्च प्रतिपादितं प्राक् एवं च वारणार्थक धातु प्रतिपाद्यव्या
पारजन्य फलाश्रयत्वमेव तत्रेप्सितत्वमिति भावः। एतेनेप्सितत्वं हि कूपादंधं पातयतीति कर्तुरिति सूत्रे प्रत्युदाहरणे रत्नाकरादयः प्रत्युक्ताः यद्यपि कर्तुरिदं रूपं कर्मस्य
स्य फलं तज्ज्ञानरूपमुक्तं योगिकेप्सित शब्दस्यापि पयसौदनं भुंक्ते इतिव्याप्तिः फलमुक्तं। नचेदमपि तमप एवकृतो नव्यावर्त्यमिति वाच्यं। अग्निपयउभयव्यावृत्तत्व
प्रकर्षस्य दुर्वचत्वात् तथापि तमप इदं फलमिति बोधयितुं तदंगीकार दोषाभावमुपपादयति। ईप्सिततममिति। विशिष्टोपादानं मा प्रत्वत्। इत्युक्तौ। इति। इत्युक्त
मित्यर्थः। श्रावकतास्येति॥ वारणार्थानामिपस्येतिभावः। ईप्सिततमे। माणवकादौ॥ अन्वये नातत् घटिते न कर्तुरिति सूत्रेण। अयं भावः। प्रवृत्तिनिमित्त गत प्रकर्षेत
वादिर्विधीयते। प्रवृत्ति निमित्तं चात्रेच्छा। तस्यास्वतः प्रकर्ष संभवेपि व्याख्यानाद्विशेषणीभूतव्याप्तिगतः संगृह्यते। व्याप्ति प्रकर्षश्च प्रकृत धात्वर्थ प्रधानीभूत
व्यापार प्रयोज्य धात्वर्थ फलीभूतरूपः नच कर्तृग्रहणात् सिद्धे मतत् तत्सूत्रे इत्यपि नेति कर्तुराक्षेपेणैव सिद्धे पुनः कर्तृग्रहणेन प्रकृत धात्वर्थ प्रधानीभूतव्या
पाराश्रयस्यैव तेन ग्रहणादिति वाच्यं तथा पुनस्तम ग्रहणेन कर्तुरित्यस्य प्रत्याख्याने तात्पर्यात् फलांशे प्रकृत धात्वर्थत्वस्य व्यापारांशे इव प्रत्यासत्त्यै व लाभेन माषष्वश्वमि
त्यादावदोषादिति॥ इदं च प्राक् प्रतिपादितं तदाहेप्सिततमत्वं चेति। फलव्यापारयोः प्रकृत धात्वर्थत्वं तु प्रत्यासत्तिलभ्यमित्युक्तं, तेन यदा पुष्ट्यर्थं माषभक्षणाय क्षेत्रे
एवाश्व बंधनं तदापि माषेष्वश्वं बध्नातीत्यादौ न माषाणां कर्मत्वं बंधन प्रयोज्य भक्षण फलाश्रयत्वेपि भक्षणस्यातदर्थत्वात्। प्रयोज्यत्वं च जन्य तज्जन्य साधारणं
अत एव गां दोग्धीत्यादौ विभागानुकूल व्यापारानुकूल व्यापारार्थक दुहि योगे पयसः कर्मत्व सिद्धिः तच्च नान्यथा इत्याह। अत एवेति॥ इत्येप्सिततमत्वांगीकारेणाये

93

स्तत्वाभावादेवेत्यर्थः उपलक्षकाभावे उपलक्ष्याभावस्यावश्यकत्वादिति भावः। तत्राग्नेर्माणवकं वारयतीत्यत्र तत्त्वावश्यकमितीति ॥ तथायुक्तमित्यस्यारंभसामर्थ्या
देव तदभावेपि तदर्थत्वसिद्धेरिति भावः नचयुक्तमेतत् तावन्मात्रेणेष्टासिद्धेस्तथाहि तदभावे इत्थं सूत्रार्थः तथेति भिन्नं पदं चावधारणे तथेत्यस्य योज्यं तथैव युक्तमि
त्यर्थः कथमित्यपेक्षायामीप्सिततमवत्क्रियया युक्तमिति लब्धं येन प्रकारेणेप्सिततमं क्रियया दनभक्षणादिना युज्यते तेनैव प्रकारेण यद्युक्तं तदपि कर्मेत्यर्थः। एतेन
चाप्यर्थ इति दृढयुक्तमपास्तं एवं चानीप्सितपदाभावे उदासीनसंग्रह एव स्यात् द्वेष्यसंग्रहो न स्यात् किंचाग्नेर्माणवकमित्यादौ प्रकर्षहीनेप्सितागम्यादेरेतेन संज्ञा प्रा
प्तौ वारणार्थानामित्यनवकाशं स्यात्। नच स्वविषये तदेव तथायुक्तमिति प्राप्तकर्म तद्बाधे न तत्सभि फलमिति वाच्यं। स्वविषये प्रकर्षहीने तद्युक्ते चेप्सिते
तत्प्रासौ बाध्यसामान्यचिंतायां माणवकादेरप्यपादानत्वापत्तेः विशेषचिंतायामपि पुरस्तादपवादन्यायेन कर्तुरीप्सितस्यैव बाध्यत्वेन माणवकादेरपादानत्वमग्न्यादेः क
र्मत्वमिति वैपरीत्यापत्तेश्च एवंचानीप्सितपदमावश्यकं तथासति अधर्मीनृतादि वस्तुतस्तु परपदार्थप्रतियोगिभूतं द्वेष्यमेव पर्युदासेन गृह्यते। किंतु तद्भिन्नमात्रं
तेन द्वेष्योदासीनयोः संग्रहः उदासीनत्वं च नोपेक्षाबुद्धिविषयत्वं नदीकूलं कषतीत्यचेतने तदसंभवात्। किंतु ईप्साद्वेष्ययोर्यत्राभावस्तत्त्वं एवंचाग्न्यादौ तथायुक्तमित्यस्या
प्राप्त्या वारणेप्सितस्य सावकाशतालाभ प्रकर्षयुक्ते तेन बाधो युक्तः तथा तथायुक्तमित्यस्यावश्यकं अन्यथा विषेणौदनं भुंक्ते इत्यादौ करणत्वमात्रविवक्षायां विषस्य तत्ता
पत्तिः प्रयागात्काशीं गच्छतीत्यत्र प्रयागस्य च तत्तापत्तिः तत्सत्वे तु समभिव्याहृतधात्वर्थप्रधानव्यापारप्रयोज्यतद्गतत्वर्थफलाश्रयत्वरूपविवक्षितत्वाभावान्न दोषः
एवंच मूलं चिंत्यं। एतेन तथा रत्नाकरदंड्या युक्तमपास्तं अत आह ॥ द्वेष्येति। चोरान्पश्यतीति द्वेष्यस्य पूर्वेणाप्राप्तेः विषयेंद्रियसंबंधात् दृश्यमाना अपि तेन दर्श
नोद्देश्या अपि त्वनिष्टदर्शना एवेति। भाष्यकैयटयोः स्पष्टत्वात्। विषं भुंक्ते इति तु न द्वेष्योदाहरणं पराधीनतयापि विषे भुज्यमाने भुजिक्रियाफलाश्रयत्वेनोद्देश्यत्वा ॥९७॥
त्पूर्वेणैव सिद्धत्वात्। तदुक्तं भाष्ये आतश्च विषयाप्सितत्वं पतद्रक्षयतीति ॥ एतेन पराधीनतया भुज्यमानाभिप्रायेणेदमुदाहरणमिति वदंतः प्रकाशकृद्रत्नाकर

इच्छादयः पराक्ताः अपि नो दासीनसंग्रहस्येष्टसिद्धेश्च समुच्चयः व्याख्याने इवेति ॥ अयं भावः सादृश्यार्थकत्वे तथाशब्दोल्लेखात्तत्र तस्ये वत् अन्यार्थकत्वेपि किंचित्सादृश्ये नो दासी
ने एवास्याः प्रकर्षहीनेऽप्सितत्वेनैवास्या इति तदभिवर्तते तदयुक्तं तथाशब्दस्य प्र कारार्थकत्वे त्पुपात्तधर्मकत्वसादृश्यस्यैव ग्रहणे नान्यसादृश्यानपेक्षणात् तथात्वस्त्वे वा मतेः
स च धर्मः प्रागुक्त एव एवं चेप्सिततमभिन्नमात्रस्य तत्प्रकारयुक्तस्य तत्र ग्रहणेन प्रकर्षहीने तत्र वारणे सादीनां सावकाशता प्रकर्षयुक्ते कर्तुरीप्सितेन बाधा दनुद्देश्य द्व्योदा
सीनयोरेव तत्र ग्रहणं पर्यवस्यतीति । वस्तुतस्तु एतद्व्यवस्थार्थमेवानीप्सित ग्रहणमावश्यकमन्यथेष्टाव्यवस्था न सिध्येत् अत एव च तत्रानुद्देश्यत्वभासमपि सुस्पष्टं सुवचमि
ति इदं चिंत्यमिति बोध्यं । तद्गृहेति भाव इति । व्याख्यानादित्युक्त एवार्थमाह । तस्यापीति ॥ द्वेष्यस्यापीत्यर्थः ॥ अपि नो दासीनसंग्रहः एतेन तत्सिद्धमस्तुलं पचेदित्यादौ तथा
युक्तमित्यनेन कर्मत्वं ग्रामं गच्छन् तृणं स्पृशतीति परममूले ग्रामं गच्छन्नित्युपन्यासो व्यर्थ इत्यपास्तं । तत्रेप्सिततमत्वस्य प्रागुक्तरूपस्य ग्रहणेन तंडुलादेरपीति प्रागुक्तरीत्यो द
श्यत्वेन तत्कर्तुरीप्सितत्व सिद्धत्वात् । किंच स्यात्पूर्वमनभिसंहितत्वेन तृणस्येप्सितत्वाभावेन तदुपस्पर्शनस्य नांतरीयकत्वेपि ग्रामं गच्छतिसस्य प्रयोगं विना नांतरीयकत्वं तथा अप्रती
तेरिति दिक् । तन्नीप्सिता नीप्सितयोः शाब्दबोधमेदस्यात् तत्तेनेदं त्वधेयमित्यादि ग्रंथासंगतिरत आह छेति । एवं च प्रकारांतरकृतवैरूप्यसत्वेपि न क्षतिरितिभावः अग्रि
मग्रंथमपि तथा योजयति ॥ तदाहेति । उक्तार्थ एव हेतुमाहेत्यर्थः पूर्वोक्तवाक्य तात्पर्यैः ईप्सादि पदं कर्मार्थकप्रत्ययांतमितिसूचयितुमाहेप्सेति ॥ ईप्सागतेति । तद्विशेषणीभू
त प्राप्तिगतेत्यर्थः तत्र बोधकत्वमुपयोगो त आह । स्वरूपत इति ॥ संज्ञोपमत्तौ निमित्ततयेनोक्तानामर्थानां स्वरूपतः सत्त्वमपेक्षितमेव घटाद्युत्पत्तौ दंडादेरिवान्यथा तदु
त्पत्तिरफला स्यादिति भावः यथाश्रुतमूलोक्तार्थी न युक्तः किं त्वयमिति स्य प्रागुक्तमेव फलमुत्तरग्रंथ योजनायाह । तदुपेति ॥ इच्छाविषयत्वानिच्छाविषयत्वाभ्यामुप
लक्षितमित्यर्थः । आदिनानुद्देश्यत्वसंग्रहः । तदाहेति तदेतद्ध्वनयन्नाहेत्यर्थः अन्यथानुत्पन्न लभ्य इति ग्रंथस्यस्वारस्यमफलत्वं स्यादितिभावः । तदुपपादयति ॥ भास
मानेति । इदं चोभयविशेषणं ॥ अर्चत इति ॥ तदुपलक्ष्यस्य तत्त्वं विना अस्वादितिभावः । आदिना निच्छाविषयत्वसंग्रहः ॥ आधारवाचित्वेनेति ॥ यत्तु मान्याः इदं चा

तु

च

रि

धिशीउ स्थासां कर्म [illegible] कर्तुरीप्सिततमं कर्मेत्यादि सूत्रविषयं बोधकं ईप्सितत्वादिरूपनिमित्तानां वाच्यत्वाभ्रमस्य तत्र प्रसक्तत्वात्। अत एव संबंधमात्रं द्वितीयार्थ इत्य... कथि-
तं चेत्यत्र समूलं संगच्छते एवं चादिवत्कर्म चेत्यादि विषये आधारवाचकत्वेपि न दोष इति तन्मताचारानुरोधेन ततस्तूनैरित्यादि मूलासामंजस्यात् तत्र समूलस्य खं-
डयिष्यमाणत्वाच्च। तदेतत् ध्वनयन्नाह दृश्यमुपलक्षणमिति। क्वचित्करणत्वविवक्षाया अपीति शेषः तत्र हेतुमाह। द्विक इति। एतेन द्विकर्मयोगे तदभावादिदं चिंत्यमिति।
खंडनरूपायुक्तमपास्तं। मूले लाघवादिति। सर्वविषये सकलप्रवृत्तेरेक विधौ नानार्थकल्पनाभाव इति भावः। ननु फलाश्रयस्य कर्मत्वे न द्वितीयावाच्यत्वप्राप्त्या
फलस्य धातुनालाभादिति वक्तव्ये क्रियाया इत्याद्ययुक्तं तद्वाच्यत्वस्य वाप्रसक्तत्वादत आह। कर्तुरिति॥ नन्वित्यादिः इति लक्षणे इत्यादि लक्षणेष्वित्यर्थः॥ विशिष्टस्य
कर्त्रादिविशिष्टस्य शक्यं द्वितीयायाः ननु तथा क्रियाशब्देन व्यापारमात्रपरेण न फलस्य धातुना लाभस्य तु तत्तत्फलाश्रयरूपं विशिष्टमेवास्तु न्यायेन शक्यं
ति स्यादत आह फलस्येति क्रियायाः परिनिष्पत्तिरित्यादावाद्यप्रसिद्धिरंतस्तु प्रसिद्धतर इति भावः। यद्यप्यादिना चैत्रादीनां ग्रहणमुचितं तथापि तत्र त्रपादि तत्प्रयोगे त-
स्यावाच्यत्वायेदं बहुत्वादिनालाभेपि कर्तृत्वेन लाभाय शालिस्यादिति शंका निरासाय चाह॥ आदिनेति॥ इदं कर्तोप्युपलक्षणं तथाच तिङ् देवदत्ते सादिग्र-
हे इत्यर्थः। मूले आधारवाचित्वे यत्राधारतां शालिमानुच्यते तत्र द्विभ्रमायेण शंकते नन्वेवमिति। अनर्तलभ्योहीति न्यायेन कर्त्रादीनामवाच्यत्वे इत्यर्थः शालिभ्रमवा- न्य
रणायाह॥ धर्मिणेपीति॥ अपिरुक्तसमुच्चायकः प्रकृता द्वितीया प्रकृता ओदनादिना। तस्यैव शालिविशेषरूपाधारत्वस्यैव क्वचित्तथैव पाठः उक्तन्यायादिति
भावः तदाह युक्तमिति। नन्वेवं प्रत्ययार्थत्वात्तस्य प्राधान्यापत्तिरत आह॥ तस्येति। पंचकं प्रातिपदिकार्थ इति पक्षे तस्य विभक्तिद्योत्यत्वात् कारकं विभक्त्यर्थ
पक्षेपि तथैव सत्त्व... वत् सत्त्वप्रधानानि नामानीति निरुक्ता च विभक्त्यर्थश्चासत्त्वभूत इति तद्धितश्चेति सूत्रभाष्ये स्पष्टं तत्रापि विभक्त्यर्थप्रधानाव्ययस्य विभ-
क्त्यर्थप्रधानत्वादसत्त्वभूतत्वमुक्तं। तदाह युक्तमिति। एवं च प्रकृतिप्रत्ययार्थयोरिति न्यायोत्र न प्रवर्तत इति भावः॥ चिंत्यमिति॥ तथा च तथा रत्नाकरे ...ख्या

द्यः परास्ता ः अभेदस्यनतस्य खंडिनत्वादाह ॥ विशिष्येति । एवं चायं ग्रंथो धर्मवाच्यत्वपक्षेपि सुयोज इति भावः ननु विशेषणभूतत्वेपि हर्याधारिकेति बोधस्य प्रागुक्तरीत्या
यद्यपि युक्तत्वं तथापि हरिः सेव्यत इत्यत्र नायं वाक्यार्थ इति प्रागुक्तमत आह । हरिमिति ॥ ननु एकत्र सर्वविरूपकाभावात्सार्थक्येपि दिवः कर्म च अधिशीङ् इत्यादि विषये
फलस्य ननिरूपकत्वमत आह ॥ कर्तुरीप्सितमिति । आदिना तथायुक्तं चानीप्सितमित्यादि परिग्रहः फलमिति ॥ उक्तरीत्यातस्यैव कर्तुरीप्सिततमत्वादिति भावः । कर्तृ विषय इ
ति । कारकं च कर्मप्रत्ययार्थत्वेन ताद्रूप्यस्थितक्रियाया अभावेन च तस्यैव स्वतंत्रत्वात् अत एवाच सूत्रानुल्लेखः स्वाश्रयेतीति ॥ साधकतममिति तमप् ग्रहणं न कारकाधिकारे
गौणार्थस्यापि ग्रहणात्साक्षात्तदा धारत्वपरत्वात्कर्तृकर्मसंज्ञाभ्यां बाधइति भावस्तदाह । स्थाल्यामिति ॥ फलीभूतत्वशाब्दबोध तयोर्विरोधादाह । पदजे ति ॥ शा
ब्दबोधकारणीभूतायामिति भावः । अत एवाह । नफलभूतेइति ॥ उपस्थितिजन्य इत्यर्थः मिथः समभिव्याहारात् । विरविवक्षित इति भावः ननु आश्रयो द्वितीयार्थ इ
ति वदतो ग्रन्थस्य अभिप्रायः तत्र प्रकृत्यर्थो विशेषणं आधेयतया फलं विशेष्यमाश्रयो द्वितीयातं शक्यतावच्छेदकं । अखंडोपाधिरूपमाश्रयत्वादं तदनुगमकं आश्रयत्व
स्य विभक्त्यर्थस्य निरूपकतया फलान्वय इति तु न युक्तं कर्मणीति सूत्रस्वरसभंगापत्तेः न चाधेयत्वस्य संसर्गत्वे तंडुलः पचतीत्यत्रापि बोधापत्तिरिति वाच्यं विभक्त्य
र्थमदारीकस्य धात्वर्थ ... पादिकार्थयोः साक्षादन्वयेन अन्वया युक्तत्वेऽन्यथा कर्मता संसर्गबोधस्याव्यापत्तिरिति न चिंत्यं सप्तमीपंचम्योः कारकमध्ये इत्यत्र
कारकपदस्य शक्तिपरत्वेन शक्तिशक्तिमतोरभेदेन शक्तिमत एव द्वितीयाद्यपर्यंतायाभाष्यादिसंमतत्वस्य प्रागुक्तत्वात् । किंचाश्रयत्वस्यातिप्रसक्तत्वात् श
क्यतावच्छेदकत्वानौचित्यात् । न च फलादिनिरूपितत्व विशिष्टमाश्रयत्वं तथा तन्निरूपणावच्छेदकत्वे गौरवात् । वैकुंठम ध्यास्त इत्यादौ तदभावे न तस्य न्यूनवृत्ति
तथा द्वितीयाशक्यतावच्छेदकत्वानौचित्यात् । तत्र शुद्धाश्रयत्वस्य शक्यतावच्छेदकत्वे नादेनानार्थता पत्तिः तस्माद्भाष्यादिसंमतमेवयुक्तं हर्यादिपदा...रात
स्य लाभेपि शक्तिमत्त्वेना लाभान्नदोषः कर्मादिपदवत्त्वेन शक्यत्वे तु गौरवं । एवं च कथं तत्कृतं वैलक्षण्यमिति मूलं चिंत्यमत आहेदमुपेति निमित्तत्वोपलक्षणसा

षष्ठ विधौ तत इति शेषः। तत्र समासे एव कथं ज्ञप्ति तत्तदर्थविभागवत्साधु आदिनावर्तं साधिकरणत्वसंग्रहः तत्रापीत्सपिरे वार्थे कर्मत्वादिप्रकारांशे एवेडिसादि गुणारो
पेण तत्तद्वि स्यादिबोधः इति कल्पसूत्रे कैयटे स्पष्टं एवं चात्रत्य संज्ञाशास्त्रैः तत्प्रवृत्तिनिमित्तशक्तेः सन्निभिबोधनमेवोचितं उद्देश्यतावच्छेदकस्येव तत्तत्संज्ञाश
क्यप्रवृत्तिनिमित्तत्वे फलाश्रयत्वाद्यर्थकत्वमि त्यादि व्यवहारा आत्र्पीपक्षे कर्मादि पदानां प्रवृत्तिनिमित्तत्वकल्पनेन तदुत्तरत्व प्रत्ययेन पदानभिधानाच्च अनादि साधु
व्यवहारस्य पूर्वव्यवहारेण कर्मादि पदानां तत्तच्छक्तिमत्ति शक्तिग्रहः इति ने दाहन्यन्ते मंजूषादाविस्थर्थं मूले तस्यानुपादानात् आहाधारेति॥ तनि तद्रूपस्येति
आधारत्वात्तस्येति शेषः मूलमते लाघवमाहाधारेति॥ आशयइति॥ आधारोवा च्य इति चलुरिति भावः॥ अनेनसूचितारुचिमाह नन्विति॥ एवेनाधारत्वस्य व्या
वृत्तिः निरूपकेति निरूपकभेदेनाश्रय भेदेन संबंधभेदेनेत्यर्थः निरूपकाश्रयभेदात्संबंधोपि स्वरूपरूपाभिन्न एवेति भावः। अखंडमिति॥ अखंडोपाधि रूपमित्य
र्थः गौरवमिति॥ एतेन ननु लक्ष्यतावच्छेदकत्वस्य च शक्यतावच्छेदकत्वस्यापि गुरुणि स्वीकारे बाधका भावः अपि च लाघ स्य संबंधेन तदेवावच्छेदकमित्युरो नै
ह कर्मणीति॥ मान्येत्युक्त व्याख्याने प्राचामनुरोधेनेति ध्वनितं। ननु आधारत्वस्य वाच्यत्वे कर्मणीत्यनेन तस्यैवोपस्थितेः कोवा सूत्रस्वरसभंगोत आह लौकेके
मौ दीति॥ आदिना करणादेस्तत्तदर्थक बहुव्रीहेश्चादिग्रहः। सूत्रेपि कर्मणि द्वितीये त्यादिसूत्रेपि। अपिभाष्यादि समुच्चायकः चितेतीति॥ अन्यथा सिद्धांत्याख्याय
कत्वं शास्त्रस्य भज्येतेति भावः। नन्वेवमुक्तरीत्या नियतपदेनाधारतानामानं सा च्छक्यतावच्छेदकानंत्येन शक्त्यानंत्यमसंगत आहाधारस्येति। आधारतात्वेन उत् भे
रूपेण आश्रयतात्वरूप शक्यतावच्छेदकतावच्छेदकस्याच्च तत्तदानंत्यमिति भावः। मूले अर्थात् संत भिन्नं वाक्यं। एवं तैकवाक्येतु चाप्योन्यतर वैयर्थ्या र
पत्तिरूलर वाक्ये इष्टमात्र संबंधो तस्या श्रेयाशयेनाहायिनेति। उपस्थितेत्यादि प्रतीतेश्चेति भावः अन्यथेदमपि विरुद्धं स्यादित्याशयेनाह सूत्रेति॥ नन्वेवंश ॥४
क्तिर्गौच्येति प्रागुक्त भाष्य सिद्धांतविरोधोत आह। शक्तिरपीति॥ कर्मत्वादि रूपा शक्तिरपीत्यर्थः अपिनापक्षद्वय साम्यं सूचितं एतैः कर्मादि पदैः धर्म्य

यं वचनविपरिणामेन तस्यात्र संबंध इति भावः

भेदं इत्यादि मदभेदं। एतेन भिन्नवाच्यत्वनिरासः प्रतिपादितमिदमधस्तात्। सर्वसंबंधानिष्टत्वादाह। येनेति॥ तथाच [illegible] इति भावः न
नु सूत्रेणांसारूप्यं ब्रह्मणापि दुरुपपादमत आह। कर्त्रादिविषय इति। कर्त्रादिपदानामिति शेषः तथाचार्थवैरूप्यं तत्रारोप्य तद्व्यापनिरिति भावः ननु कृ[...] स्वपि धर्ममात्र
मर्थ इति नलदा यतिरत आह। कृतामिति॥ अन्यपापाचक इत्यादि हेतोरसामंजस्यं स्पष्टमेवेति भावः अतएवाह कृतामिति। एवंचस्वीकोंच्चेनि मूले ऽपपाठः
एतेन चो इत्यादि नहसमर्थनमपास्तमिति भावः इत्रादेरतादेशस्यापि सत्वादाह। लादेशेति। आदिनाशानजादिपरिग्रहः लिङ्गमंतत्वान्न तद्विशेषणं मिथो
र्थकृतमिति शेषः स्पष्टं चेदं न्यत्रा आदिना र्यजरतीयत्वागादिग्रहः ननु आविवक्षायाः प्राप्तिपूर्वकत्वेन नटस्य तदप्रासत्वा तत्क्रियाजनकत्वेनाकारकत्वाश्रा
कथितं चेत्तस्याप्राप्तिरिति विमर्श परिगणनमत आह। ध्यापादानादीति। तद्रूपेणाभानमित्यर्थः चस्त्वर्थे कारकाधिकारात् कारकं सत् कथितमित्यर्थे नकारक
त्वे सत्येव संसर्गाभाव्यमिति सामर्थ्याद्विशेषलाभः अकथितशब्दोत्रोकीर्तितपरो नाप्रधानपर इति भावः सर्वथाप्रसक्तत्वाविवक्षा चेत्तुभयत्राकारम
श्लेषः अपिरेवार्थे ग्रहणे। अग्रे योज्यः सिद्धो यथाश्रुतो वा एवंच पूर्वविप्रसक्तिः पूर्वकं तदविवक्षायां सर्वथा पूर्वविधेरप्रसक्तौ चेत् तत्र वृत्तिरिति भावः
परिगणनेन तत्रवारणं परमाख्यातोपयोग इति सूत्रभाष्यमत्र प्रमाणमिति गूढाकूतं मकृतेचेति॥ नटस्य शृणोतीत्यादावित्यर्थः सर्वथा तत्र तदप्राप्ते
रिति भावः चस्त्वर्थे एवमग्रेपि यद्वा उभयोर्मिथः समुच्चायकं चद्वयं आख्यातोपयोग इति शास्त्रेति। अन्यथा तत्रोपयोगपदार्थे व्यमिति स्पष्टं तत्रैव भावे
नट विनागीतश्रवणायोगात् द्वारेण द्वारिणा नान्यथा सिद्धिरधिकरणवदिति भावः। तस्य नटस्य। एवंप्रागपि नटसंबंधिश्रवणमित्यर्थे न तस्या कर्म
कत्वादिति भावः एतेन गाथा कर्मकं नटसंबंधि श्रवणं वास्यार्थ इति रत्नाकरदृक्त्वाख्यातुमपास्तं। षष्ठ्यर्थस्य स्वान्वययोग्यार्थकनामसम
भिव्याहारे तत्रैवान्वयस्तु सतः स्फुटीभविष्यत्यनुपदमतत्। नच परिगणनेपि गां दोग्धि पयः स्थाल्यामित्यत्र स्थाल्यामित्यस्या अधिकरणत्वविवक्षायां

म प्र वि ति

२८ स न

५१

नि

कर्मत्वापत्तिः पयोरूप कर्मण्युक्तत्वादिति वाच्यं धात्वर्थव्यापाराश्रयत्वसंबंधस्यैव सति संभवे तत्र ग्रहणादिति बोध्यं। कर्मयुक्तत्वं न परिगणनलभ्यं तस्यात्र सत्वा
दिति प्राचोक्तिः खंडयन्ति॥ नन्वेति॥ अ। स्थालीस्थतो दिति॥ तथाच श्रुधातोर्निस्सरण ग्रहणे लक्षणेति भावः। एवंनामस्यात्रेति। एवं चैकैव संगच्छते इति नत्रे वाध्यं प्र
व — योग इति अनुपयोगे तद्विवक्षायां न दाधृणातीति भस्यैवेति भावः। ईदृशलक्षणयेति। निस्सरणांशे ग्रहणं श्रुधातोर्लक्षणये त्यर्थः अन्यथोपयोग ग्रहण वैयर्थ्यापत्तिः
स्पष्टैव। अनेनोपयोगे प्रसिद्धार्थे तथा प्रयोगो स्यैवेति सूचितं। संबंधमात्रमर्थ इति वक्ष्यमाण मौल सिद्धांताशयेन गां संबंधीति बोधोनयुक्तः तस्यैव खंडयिष्य
माणत्वादतआह। गोकर्मकमिति रत्नाकरोक्षर्बं। एवं च मूल तथा दंड्यां धुलं चचिंसं। इति बोध्यं अंतः स्थितद्रवद्रव्य निष्ठ विभागानुकूल व्यापारो दुहेरर्थस्तत्र वि
भागावधित्वा विवक्षायामनेन कर्मत्वं गोरिति भावः नन्वेवं कर्तुरीप्सितेनैव सिद्धौ तथायुक्तमित्यस्यापत्त्या सोव्यर्थो तआह। तत्रेति। तयोर्मध्ये इत्यर्थः। पयसएवे
ति। उद्देश्यत्वादिति भावः। वस्तुतस्तु प्रागुक्तेप्सित तमत्वस्योभयत्र सत्वात्तदुपत्त्या सोव्यर्थ एव अतएव तथा रत्नाकर दंड्यां धुलं चिंसमिति बोध्यं। प्रतीतेरिति।
गां दोग्धि पय इत्यत्रेति भावः न्यायसिद्धत्वे स्तस्य सूत्रं विना नैयायिकादिवल्लोकसिद्धत्व इत्यर्थ भ्रमनिवारणायाह। व्यापारद्वयेति। उद्देश्यं कर्तुरीप्सितेन तदन्य
स्य तथायुक्तमित्यनेनेति भावः इदमपि मूल रीत्या नस्वरीत्येति बोध्यं मूलकृता रुचि बोधनाय तथोक्तत्वेप्यस्यैव सिद्धांतत्वादाह। हेतुमतीति॥ परत्वमूलभूतं
चरितार्थ्यं तयोराह। ग्रामादिति॥ संज्ञांतरेति॥ ग्रामनिष्ठविभागस्य धात्वर्थत्वेनानुद्देश्यत्वेन [illegible] च संज्ञाप्रसंग इत्यर्थः इत्यादाविस्यैव सावकाशेत्युः। तद्वय
गुणेति — स्यादिति भावः। ननु गां दोग्धीत्युदाहरणप्रकृतसूत्र विषयत्वलाभेन कथं गत्यर्थत्वे तद्भाष्यं साधकमत आह तद्भाष्यमिति। इत्येतद्विषयमिति। इत्येतद्विष
अ — यकमित्यर्थः। असंगतेरिति॥ युगपत्समावेशाभावादिति भावः उत्तरीत्या अवधित्वादेरवच्छेदकत्वेन सूत्रेऽनुपादानादाह। अपादानत्वेति। संज्ञाशब्द नियमादपा
दानत्वशब्दस्य पूर्वनिपातः एतेन प्रकृत धात्वर्थ फलाश्रयत्वरूप कर्मत्वस्य प्रकृत धात्वर्थ गतत्वनाविष्टत्वे सति तज्जन्य विभागाश्रयत्वरूपादानत्वस्य चल ॥५०॥

प

त्समनि[illegible] यता संबंधोपाधिविशेषरूपस्य वायुगपद्विवक्षाभाः कर्तुमशक्यत्वेनोभयो प्राप्तौ कथं परत्वाद्दुहिरित्यपादानं। नन्वेवं कथमपादानत्वबोधो वा चक्राभा
रत आदेर्दृष्टोचेति॥ तद्भाष्येत्ति॥ मूलोक्त इत्यर्थः यदि तथा तस्या कथमेकैवेति नियमः। कथं चापरत्वाद्द्वाधोति रिति भावः एवं चैयानिष्टविभागानुकूलव्यापारो दुहेरर्थस्तत्र विभागाव
धित्वस्य तदनुकूलव्यापाराश्रयत्वस्य च गविसत्वं इतोऽप्याधारे द्वितीयार्थ इति प्रागुक्तमसंगतं किंतूपलक्षणपरतयैव व्याख्येयं। टीकायां तत्रैवेतदनुक्तिस्तु स्तस्याप्यत्र सत्वात्
एतेन तद्भाष्यानुरोधेनेदं सूत्रं नियमार्थं अकथितस्य यदि सा तर्हि दुहादिसंबंधिनं एते [illegible]नां तर्भावितण्यर्थतायां मैत्रः श्वैत्रं कटं करोतीति तत्प्रयोगः विध्यर्थत्वेत्विदं दुर्वारमि
मिति प्राचोक्तमपास्तमिति बोध्यं। इतिस्थितमिति मौलसिद्धांतस्यौतत्वं बोधयितु माह तामिवाहात्रेति। उक्तार्थे इत्यर्थः एवेन व्यापारद्वयनिरासः अनेन तु तदवच्छिन्नोन
सूत्रद्वयेनेत्यर्थः। वस्तुतोऽन्येन कर्तुरिति सूत्रेणेत्यर्थः॥ अन्येष्वपि। भाष्यापरिगणितयादिषु मौलार्थमभ्युपगम्याप्याह॥ किंचेति। अपि तानत्थायुक्तमित्यादि परिग्रहः एवमग्रेपि
षष्ठ्यपवादत्वेति। तत्तच्छास्त्राभावे सर्वत्र षष्ठी प्राप्ता सर्वासां तदपवादत्वमात्रेणेत्यर्थः। संबंधत्वेनेति। तत्तेन तन्निष्ठबोध्यता निरूपितबोधकत्वेत्यर्थः। अन्यथा विशेषरूपेण
बोधोच्छेदापत्तिरत एव कर्मणि द्वितीयेत्यस्य नवैरूप्यं। अत एव चैतत्सूत्रशेषभाष्ये तेनैव सिद्धे आद्यसूत्रद्वयवैयर्थ्यमाशंक्योप्सितमात्रस्याप्यनेन संज्ञायां वारणेत्स्यानवका
शत्वे माणवकादपि पंचमीस्यादितीप्सिततममित्याद्यारब्ध अपिसुतरितं एतेन दुहादीनां व्यापारद्वयार्थत्वे कर्तुरिति कर्मत्वे तत्तेनाविवक्षायामप्यनेन कर्मत्वमिति मूलोक्त
मपास्तं वक्तृत्वे व्याघातात्। अत एव च कर्तुरित्यनेन सिद्धमाश्रित्यास्य वैयर्थ्यं भाष्ये नाशंकितमत एव चोद्देश्यतावच्छेदकाभानमिति भावः। तदेतद्ध्वनयितुमुपसंहरति। तस्मादि
हेति उक्तहेतोरित्यर्थः। अत्रापि अकथितं चेत्ते तद्विषयेपि अपि रन्यसूत्रसमुच्चायकं स्पष्टार्थमाह। क्रियेति॥ कारकत्वव्याप्यसंज्ञानां स्वबोध्यार्थे कर्मत्वादिशक्तिमत्वबोधक
त्वादि। एवं चापादानसंप्रदानाधिकरणानां [illegible]तत्तेनाविवक्षायां कर्मत्वेनैव विवक्षेति तत्वं। मूलादि खंडयितुमुपक्रमते व्यापारद्वयेति बहुव्रीहिः॥ अपि[illegible]
तोक्त रीत्या तथायुक्तमित्यस्य संग्रहकः। यथाप्रयोगमित्यनेनातिप्रसंगो वारितः। बहूनामित्यनेन मूल[illegible] परिगणितभिन्नानामपि ग्रहणं सूच्यते। नन्वेवं कथमिष्टत्वादि

एव संम

भाच्या

न

नमं

व्यवस्थेत्यत आह। नत्रये इति ॥ कर्तुरीप्सितं तथायुक्तं अकथितं च गतिबुद्धी सादिविषया नेक द्विकर्मकण्यंतदुहादिस्थ्यादीनां मध्येये आद्यसूत्रविषयाद्विकर्मका इत्यर्थः ॥
इत्युक्तेरिति ॥ इतिभाष्योक्तेरित्यर्थः। नन्वेवं प्रधान कर्मत्वमुद्देश्यत्वरूपं शतस्येवेति तत्रैव लादयः स्युरुभयत्रवास्युरित्यंते तु गर्गरूप एव कर्मणि अप्रधाने दुहादीनामिस्तु
त्वे इत एव गर्गाः शतं दंड्यंतामिति भाष्य प्रयोगसंगतिरित्यत आह। प्रधान कर्मत्वं चेति ननु कर्मप्रत्ययस्थले। फल[illegible] व्यापारयोर्विशेष्य विशेषण भाववैपरीत्यात्तत्रैवेष्टं तत्
गर्गाणां न स्यात् अत आह। कर्मप्रत्यये इति ॥ व्यापारेति कर्तृनिष्ठेति च स्वस्वरूप कर्मत्वं तस्येव्याद्विशेषणं फलमित्यर्थः मात्रशब्देन साक्षाद्व्यापार जन्य फलस्यैव ग्रहणे न परं
परया तत्वविशेषण फलव्यावृत्तिः ननु तेषां दुह्यादित्वं प्रकृत्यादेरुद्देश्यत्वरूपमार्थं प्राधान्यमेव त्वाघुसति नियामकं कुतो नौशीति क्रियते आह। ण्यंतेति। न्यादयोण्यंत निष्कर्म
गत्यर्थी मुख्यकर्मणीत्यत्र मुख्य[illegible]त्वस्य ण्यंते कर्तुश्च कर्मण इत्येतदेक वाक्यतया दे[illegible]स्यैव ग्राह्यतादित्यर्थः अन्यथा मिथोविरोधः स्पष्ट एवेति भावः तदेवोदाहरणेन विशद
यति। गर्गा इति। एवेन शत व्यावृत्तिः। ननु त प्रधानकर्मत्वं। स्वसंप्रे[illegible]नानुकूल व्यापारानुकूल शासनरूप व्यापारो दंडेरर्थः स्तत्र साक्षाद्व्यापार जन्य फलाश्रयत्वा[illegible]तेषामेव
तत्वमितिभावः। नन्वेवं प्रधान गर्गानुरोधाच्छतस्या[illegible]व्याप्यत्वापत्तिः सूत्रे भाष्यविरोधो तत आह शेषादेरुपत्वेति। अन्यथा कर्तुरिति कर्मत्वाभावे नाक्षिलीयान स्यादिति भावः
विरोध इति। तद्भाष्यस्य तादृश प्राधान्याप्राधान्यपरत्वादिति भावः। अत एव प्रधान कर्मणीति सर्वपद्यमुक्तोत्तरार्धे पाठे नानिरिक्ताद्विकर्मकाः क इति प्रश्ने नीवह्योर्हरते
श्चापि गत्यार्थानां तथैव च द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चय इत्युक्तं। तत्र न्यादि ग्रहणं तव कृषिवत्समस्त व्यापारद्वयार्थक धातूपलक्षणं। अप्रधाने दुहादीनामित्यस्यैव
विषयं वक्तुं तत्तीय द्विकर्मक स्थले तद्व्यवस्थामाहै केति। अकथितं चेति सूत्रविषय इति भावः आदिना दुहि याचि रुधि प्रच्छि भिक्षि चिञामुपयोगनिमित्तमपूर्वविधौ बुविशा
सिगुणेन च[illegible]यत्सचते [illegible]तदकीर्तितमाचरितं कविनेति भाष्योक्तः समानां ग्रहणं। कर्मणीत्यस्य लादय इति शेषः ननु धात्वर्थ प्रधान व्यापार साक्षाद्विशेषण फलाश्रय
त्वस्य प्रधान कर्मत्वे परंपरया विशेषणफलाश्रयत्वमप्रधान कर्मत्वं लब्धं तत्र नगो नेवाथ्यपस इति कथं तत्रनिर्वाहः अनुदेश्यत्वरूपमप्राधान्यं तु न तद्रुत्यत्तोनि

क।सा श्य दानक

मु

नियामकमत आह प्रधानत्वं चेति। अप्रधानकर्मत्वे त्वित्यर्थः। तत्रार्थी पयोनिष्ठविभागानुकूलव्यापार एव धात्वर्थे गौ क्रियमाणे इत्यर्थः अत एवाह। फलाश्रयेति। तस्य धात्व
र्थतावादिति भावः। तथा सति वक्तव्यं फलितमाह द्वंचेति। तेषां प्रधानकर्मण्येतेषामप्रधाने कर्मणीत्येवं लादिव्यवस्थाया द्विकर्मकत्वस्य च सिद्धेश्चेत्यर्थः। ननु परिग
णनमध्ये भाष्यानुक्तमूलोक्तपच्यादीनां व्यापारद्वयार्थकत्वेन द्विकर्मकत्वस्यैव लादिव्यवस्थाया अपि मूलमते प्रधाने दुहादीनामिवानेनैव वात्रमते प्रधानकर्मणीत्य
नेन साधितत्वेऽपि षामेव व्यापारार्थकत्वे तदुभयं न स्यात् भाष्ये परिगणनेन तद्विधानात्। तथा चासाधुत्वं स्यात् तत्र तथाप्रयोगस्य अथ तद्विषये व्यापारद्वयार्थकत्वं
नियतमिति चेत्सर्वत्रैव तथास्तु मास्तु कथितं चेति सूत्रमिति चेन्न तदनुक्तत्वेन तत्र तेषामसाधुत्वेष्टापत्तेः। अत एव सूत्रावश्यकत्वाच्च एतेन मूलोक्तमेव युक्तं न तु व्या
पारद्वयार्थकत्वेन साधनमित्यपास्तं इति ध्वनयन्नाह। भाष्यानुक्तानामिति॥ पच्यादीनामित्यर्थः अत एव तण्डुलान्विक्लेदयन्नोदनं निर्वर्तयतीत्यर्थः इति कैयटोक्तिः संग
च्छते युक्तं चैतत् अन्यथा ख्यातो प्रयोग इति सूत्रभाष्योक्तपरिगणनत्वभङ्गापत्तिः किंच भाष्ये भिक्षिग्रहणवैयर्थ्यापत्तिः उभयार्थकयाचिग्रहणेनैव सिद्धेरिति तदाहार्थेति
नन्वेवं द्विकर्मकत्वसाधनेति प्रसङ्गापत्तिरत आह। एवं द्व्यर्थत्वेनेति॥ व्यापारद्वयस्य धात्वर्थत्वकल्पनया द्व्यर्थत्वेनेत्यर्थः एवं च परममूलं मूलमत्र समग्रिमं च तथा कैय
टरत्नाकरदर्प्याद्युक्तं च चिंत्यमिति बोध्यं विस्तरस्त्वन्यत्र बोद्धव्यस्तदाहेति॥ व्यापारद्वयार्थत्वे तत्वेमात्रविवक्षाया निर्मूलतोलभ्यते तथायुक्तेरत्र स्तत्राधिकरणमा
ह। विभागेति॥ मात्रपदेन व्यापारद्वयार्थत्वे तत्त्वमात्रविवक्षाया निर्मूलत्वोक्तेः व्यावृत्तिः मोलमात्रपदेन कर्मत्वव्यावृत्तिः रत्नाकराद्युक्तिं खण्डयति॥ न चेति। एवं चोभ
यथापि तथाप्रयोग इति भावः। षष्ठ्यन्तार्थस्येति। शेषेत्यादि समभिव्याहारे इत्यनेन मातुः स्मरति नटस्य शृणोतीत्यादीनां साधुता सूचिता। व्युत्पत्तेरिति॥ एवं च तत्र न
तदर्थस्येति [illegible] क्रियान्वय इति भावः तत्र मूलं ध्वनयति। अत एवेति। तत्समभिव्याहारे तादृशनियमादेवेत्यर्थः आदिना तण्डुलानोदनं
पचतीत्यादिसंग्रहः तत्र हि निर्वर्तनं विक्लेदनं च पचेरर्थः तण्डुलान्विक्लेदयन्नोदनं निर्वर्तयतीति वाक्यार्थः॥ षष्ठीति। निर्वर्तने च पाकस्य करणत्वमित्यपि बोध्यं। तथा

प्र

सतीति वाक्यार्थमाह। तंडुलेति भाष्य इति। कर्तुरीप्सित इति सूत्रे इति भावः। नत्विति। तंडुलानोदनं पचतीति सत्कर्मकत्वेनाविवक्षायां शेषत्वेन तदन्वयेन त्वित्यर्थः। अत एव पचेर्द्विकर्मकत्वं वक्ष्यते चेदमनुपपन्नमेव तदाह। दिगिति। मूले माचा प्रक्रिया सूत्रायालुरत्नाकरदंड्या दिः ॥ हरिसादि मूलं चिंत्यं तस्य पाठाभावेपि संज्ञाया अर्थनिबंधनत्वाद् ग्रहणार्थत्वात् ... ग्रहे द्विकर्मकत्वानपायात्। न च नियम पूर्वकग्रहणं दण्ड्यर्थः केवलं ग्रहार्थ इति तयोः पर्यायतेति वाच्यं। दंडिश्चेत्यादिस्वोक्ति विरोधापतेः आग्रहपूर्वकप्रश्ने तु दः केवलश्चेत् पृच्छिश्च प्रयोगस्य संभवेतु भ सिद्धेस्तेन तयोरपर्याय तयारबोधार्थ निबंधनश्चापकस्यासंबद्धत्वापत्तेश्च अंशतोपि पर्यायत्वांगीकारे तुल्यं प्रकृतेपीति तन्न। अधिकप्रविष्टमितिन्यायेन न्यूनार्थकेनाधिकार्थकग्रहणेपि वैपरीत्याभावे नादोषात्तु सिद्धांतरीत्या दोषलेशाभावाच्च तदेव ध्वनयितु यथा श्रुतमूलं नास्तीति। भाष्यानुक्तत्वादिति भावः। अत एवाह। द्विकर्मेति। ननु द्विकर्मकत्वस्य तथात्वनाधितत्वेन कथं प्रक्रिया कदोल्कोदाहरणमुक्तमत आह। शास्त्रवि ति। अत एव यदीति प्रागुक्तं। तेन तथा प्रयोगाभाव एव सूचितः एवं चापादानत्व विवक्षैव तत्रैतिभावः। ननु तथा प्रतीतिसत्वे तदविवक्षायां तदपि सिद्धमेवातस्त वे दंडो आग्रहं विहाय मूले कृतारमाह। परास्त्रमेतति ॥ अत एव पुनरुक्तिसंगतमेवोपात्तं एवं चानार्ष तदीयप्रयोगे तथा पाठः एवाप्रयोजक इति मूलोच्छेद इति भावः। तथाद्वि कर्मकत्वस्य तेषां सिद्धांते इष्टत्वेपि वक्ष्यमाणयथानुरोधेन मूलानभिमतत्वे तत्पादयोजकत्वादाह। कथितेति ॥ ननु भाष्यादिसंमतत्वाभावेन कथं प्रामाणिकत्वमत आह। केयटेति ॥ आदिना हरदत्तपरिग्रहः। ननु प्रागुक्तमुख्यकर्मत्वस्य गर्गाणामेव सत्वेना दोषेणैवं चेत्या घसंगतमत आह। तइति तत्संमतत्वादित्यर्थः। तदीयैर्वा कैयटादिरीत्यैव। एवेन स्वरीति व्यवछेदः इदमेव ध्वनयितुं वक्ष्यति। लाघुसत्वीति ॥ दूषणमिति संदर्भाशुद्धौ दूषणमाहेत्यर्थः। अग्रिममूलानुरोधेन तथैव तत्वमिष्टं तस्यैवा हो दूषकत्वादिति तस्य इत्यस्य। आर्थेनि रत्नस्याहिरण्यकरणाकप्रार्थनावत्त्वं इत्यर्थः। एकदेशान्वये समासस्य च भाष्यप्रामाण्यादिति भावः। ननु ग्रहणार्थ ॥५२॥ त्वेनितरां ग्रहणार्थत्वं सुतरामत आह ॥ शारीरेति। तस्मादेवेति ॥ अर्थिनश्चेत्तस्मादेवेत्यर्थः। एवं च मूले वाक्यशेषादिति हेतुर्मध्यमणिन्यायेनोभयत्रान्वयेतीतिभावः

मूलोदिखंडयति ॥ एतदिति ॥ प्रागुक्तमिति । कर्तृप्रत्ययसमभिव्याहार इत्यादिनोक्तमित्यर्थः ॥ इदं सर्वमिति । मूलं परम मूलं तथा श्लोकपठनं प्राचीन खंडनमुक्तं

वक्ष्यमाणं चेत्यर्थः सर्वप्रागपि । उक्तदिशा उक्तरीत्या एतेन तथार त्वाकरदंड्याद्युक्तं चिंत्यमिति सूचितं । मूल व्याख्यातारः प्रकाशकृतः । ननु वक्ष्यमाणरीत्या प चेर्द्विक

र्मकत्वस्य स्पष्टत्वेन कथमप्रमाणि कमतमाह । अकथितेति । भाष्यानुक्तत्वादिति भावः । अतएव तैरत्रार्थे संमतित्वेन यदाहरदत्तः अकथितेत्यादि परिगणनादियत

मूलकृता ग्रंथः लिखितः भाष्यासंमतत्वादाह । पचेरिति । दूषणमिति ॥ अप्रमाणि कते कर्म वत्कर्मणे त्याद्युक्तदूषणमित्यर्थः । आदिना हरदत्त परिग्रहः । तेद्वा हा

त्रेति । व्यापारेति ॥ फलपाकानुकूल व्यापार तुकूल व्यापारार्थत्वेत्यर्थः कर्तुरित्युक्त्वे नाकथितमित्यस्याविषयत्वासूचिता एते नोदनं चैत्रः पचति मैत्र इति

नव्यमते साधु नभाष्य हरदत्तादिमते इति रत्नाकरोक्तमपास्तं । वृक्षस्येति । उदुंबरफलं पच्यते इति भाष्योदाहरणे इति भावः । एकव्यापारेति । कालनिष्ठ

प्रधान व्यापार इत्यर्थः ॥ सुपपादत्व इति । सूत्रनाम कर्मकत्व प्रयुक्ता प्रासावे तैत्तस्य विध्यर्थ नोचितेति तथैव इति भाष्य लोप पति रन्यथा निषेधा प्रागेव पचेः

प्राकृ उचित इति भावः ॥ नैतदिति । अकथितमित्यत सूत्र विषयकत्वेत्यर्थः । दुहादावस्य भाष्ये गणनात् । गौर्दुग्धे इत्यपि कर्तुरिति कर्मत्वे एवोदाहरणं विभागानुकू

लव्यापारार्थकत्वे एव दुहेस्तदुदाहरणमिति तुनयुक्तं तत्रार्थे कर्मस्थ क्रियया तुल्यक्रियत्वाद्युपपादनात् । एवं च प्रकाशोक्तिस्तथा रत्नाकर दंड्याद्युक्तिश्चयुक्तै

व परंतु तत्र अन्यदीयत्वं कैयटानुक्तत्वं मूलमतस्य सिद्धांतत्वं चेदंमुक्तं चिंत्यं । एवं च तंडुल रूपि कर्मणि प्रत्यय इति मूलकृदाद्युक्तमयुक्तमिति बोध्यं । एतेनमा

धवोक्तेति पूर्वोपपादितं भाष्यसंमतं यन्मतांतरे मुख्यमतं तदित्यर्थ एवं च हरदत्तोयुक्त एवेति भावः ॥ एतत्त्वे खेनमूलकृतोपीष्टमेवेष्टमित्याह ॥ भाष्येति ॥ अनेन

प्रति हरदत्तस्य मुख्यमताभिप्रायत्वमिति पादनपरोक्तग्रंथेनेत्यर्थः । अन्यथा तदयुक्तमेवेत्येव सिद्धे एतदुक्ति रफलेवेति भावः ॥ अस्य ध्वनितमित्यत्राप्यन्वयः आतए

वचः प्रयुक्तः मूलेस्पष्टं तथोक्तत्वादत्र सूचयति । ध्वनितमित्युक्तं । स्वपरेति ॥ स्वं मूलकृत् परो माधव हरदत्तादि यथा श्रुतेत्येनेन मूलवत्तस्याप्यन्यथा योजने

३ भाष्य संमतं यन्मतांतरे प्रमाणाभाव एवेति मान्यास्तत्राचामनुरोधेनेति ध्वनयति । पूर्वोपेति । पूर्वोपपादितं × २

105

के

तुसोप्यदुष्ट एवेति सूचितं। तथाहि तद्वार्तिके तदुदाहरणमादाय वृक्षस्य कर्तृत्वविवक्षायामसंतमप्राप्ते वचनं। पक्ष्यपचिरत्र द्विकर्मी वृक्षपाकं विना फलपाकासंभवाद्वृक्षो वृथि
तं कर्मेति तस्यैव च यदा कर्तृत्वविवक्षा तदा यं कर्मवद्भाव इति कैयटः। तत्राकथितपदमविवक्षितपरं कर्मत्वेनाविवक्षितमित्यर्थः किं तुं न तर्हि विवक्षेत्यत आह तस्यैव चेत्तीति। मू
लेव्याख्यातमिति॥ प्रसादकृतेति भावः। उक्तमिति। व्यापारद्वयार्थत्वेनोक्तादिग्रंथेनेति भावः [illegible] मूलकृतस्तदर्थानिष्ठत्वप्रतिपादनद्वारा थैति॥ आदिनामा
धवद्दत्तप्रकारान्कृत्वा करदंऊ्यं तानां ग्रहणं। उपसंहरति॥ द्विकर्मेति॥ यथाप्रयोजनं सर्वेषामिति भावः। ननु कुरुपंचलादेरेव ग्रहणे किं मानमत आह। व्याख्यानादिति
अधिशीङि: स्यादिवैयर्थ्यं मूलकादिनिगमनाविरहादधिकरणविवक्षायां कुरुपंचालादिभिन्ने चेदं न प्रवर्तते इत्युभयार्थज्ञापकरूपादित्यर्थः नन्वयुक्तमेतत्तस्य आधारार्थज्ञा
पनेन चरितार्थ्य द्विलीयार्थज्ञापने मानाभावात् यावत्ताविनानुपपत्तिस्तत्सर्वं [illegible] ज्ञाप्यमिति सिद्धांतात्। नच विनिगमनाविरहः तदुपस्थितेरेव विनिगमकत्वात्। किंचा
धिपूर्वाणामेषामाधारः कर्मेति नियामकत्वेन तत्त्वसंभवात्। तथाच [illegible] वैकुंठे वर्तते इत्यादावति प्रसंग एवातआह। तथैवेति॥ मूले मित्यादिरिति। आदिना स
मानोदरे शयित ओचोदात्त इति वाच्यं यद्यपि मूलकृतो वार्तिकेनैव सिद्धत्वमिष्टं तथापि तस्याविधायकत्वस्य वक्ष्यमाणत्वादन्यथा तत्त्वमुपपादयति। शीङादेर
पीति॥ शयनपूर्वक इति शयनादि करणक इत्यर्थः शयनादिना वैकुंठं व्याप्तं तीत्यर्थात् व्याप्तिरूपफलाश्रयत्वात्कर्मत्वमितिभावः। स्यादिति तेषामप्यासनादिक
रणके व्यापने इत्यासा मासादिनिष्ठव्याप्तेः फलत्वेन तदाश्रयत्वात्तेन कर्मत्वं मासमासनेन व्याप्तोतीत्यादि क्रमेणार्थ इति भावः। एतेन तथोपपादक इत्याकरदंऊ्या दयपरा
स्ताः नन्त्विवं तादृशादेशाग्रहणेपि सूत्रवैयर्थ्यमुक्तरीत्या तदवस्थमेवातस्तत्फलितमाहेवं चेति॥ तादृशदेशाग्रहणे चेत्यर्थः एतद्वचनाभावादाहेवं कल्पनेति। स्वकर
ण कव्यापन इति कल्पनयेत्यर्थः॥ तद्देशेति। कुरुपंचालादीनामेवेत्यर्थः। नान्येषां वैकुंठादीनां। अन्यथा तत्सूत्रानर्थक्यं स्पष्टमेवे [illegible] ति भावः मूलतथास्पष्टम
प्रतीतेराह॥ सूचयतीति॥ ननु क्रियाया अपि कालत्वेन प्रसिद्धिरस्ति प्रसिद्धपरिमाणासूर्यक्रियैव क्रियांतरपरिच्छेदहेतुत्वात्काल इत्युक्तेरत आह॥ क्रियाया इति॥

तन्ते

106.

एवं न कालव्यवच्छेदः साक्षात्काल एव क्रियाविशेषणत्वेन प्रसिद्धः जन्यमात्रं कालोपाधीतस्य जन्यपदार्थं प्रति कालस्य क्रियाद्वाराविशेषणत्वं न तु तस्य कालत्वमित्यर्थः
क्रियान कालः किं तर्हि तिरित्यत इति सर्वमञ्जूषायां स्पष्टं। अर्थान्तरनिराकरणायाह। दिशेति। उक्तत्वादिः तद्देवाह यत्निति। सन्निहितत्वं तत्परामर्शे बीजं। जन्यमात्रस्य का
त्वमिति तत्प्राप्तिः। कालपरिमाणविशेषत्वात्काल उपाधिः। निमित्तं यस्य जन्यस्येति कालोपाधीतस्यार्थ इति तद्भावः। उक्ताशयेन समाधत्ते जन्यमात्रस्येति। तुष्यदुर्ज
नन्यायेनाह। यदिहिति। अनेन नैयायिकादीनां तथात्वेपि स्वीयं न तथा मतमिति सूचितं। तदाशयस्तूक्तः। तदा तदापीत्यर्थः तस्य जन्यमात्रस्य एतेन तथा
प्रकाशकरत्ताकरदंड्याद्युक्तमपास्तं। यत्तिदमेव कर्मसंज्ञाविधायकमिति यथाश्रुतमूलसामंजस्ये तथा व्याख्यानमसंगतमिति तत्र भाष्ये तादृशवचनानुपलं
भात्। अकथितं चेत्यत्र कर्मकं इति कण्ठ्येनतानां कथं द्विकर्मकत्वमित्याशं [illegible] कायां कालभावाध्वगन्तव्याः कर्मसंज्ञाह्यकर्मणां देशश्चेति भाष्योक्तं तु न विधायकं
हि शद्दघटितत्वात्। किंच कालाध्वनोरित्यत्र कालाध्वानौ कर्मवदिति वार्तिकप्रत्याख्यानाय प्रकृतमेवैतत्कर्म यथाकटं करोतीत्युक्तं। प्रमादो कृतं प्रकृतमुत्स
र्गसूत्रं तेन बोधितमिति तदर्थः तस्मादुक्तरीत्यैव कर्मत्वमत एव समायां समायां विजायत इति विग्रहकथनपरं भाष्यं संगच्छते। सकर्मकविषयेप्यनेन प्रका
रेण कालादिकर्मणा सकर्मकत्वं तुल्यन्यायात्। तेन मासमोदनं पचतीत्यादिभवत्येव। तत्र कालादिकर्म अप्रधानं द्रव्यकर्म तु प्रधानं [illegible] काल
स्याधारत्वेन द्रव्यद्वारैव क्रियासंबंधात् एवमकर्मकशब्देनात्यन्ताविद्यमानकर्मकस्य वाविवक्षितकर्मकस्यापि ग्रहणं तेन मासं पचतीति भवत्येवेति दिक्। तदेत
द्दिनिधायाह तत्त्वेति। मूले प्राचां प्रक्रियाकृतां न तु तद्रीत्या तत्प्रयोगो दुर्वार एवात आह। स्वायमात्रेति। उक्तभाष्यादिप्रामाण्यान्नैवं न कल्पनेति भावस्तु
हृत्त्वेति। यद्यपि कुचिदिति तत्र तासुचितसूचनायेति दोषत्रयं सुपरिहरं। तथापि न दीमास्ते इत्युदाहरणासंगतिदोषस्तदवस्थ एवेति बोध्यं। ननूभयगतिरिहे
त्युक्ते ईतौ व्यभिचरितत्वं इत्विमे एव कार्यसंप्रत्ययादिति। तदर्थीत आह। कार्येति। सामान्याक्षेपनियामकं न तत्संज्ञाकरणादिति भावः। यदि तु संज्ञानां सज्ञा

तीयापेक्षोपेनियमत्वं तदोभयगतिरिति तात्पर्यं। अपिनाद्यादिसमुच्चयः। कृत्रिमेति। भोक्तुमिच्छतीत्यादौ किंच सर्वत्र बुद्धिसंदर्शनं प्रार्थना व्यवसायारंभनिर्वृत्तिं
फलावाप्तेः सत्वेन संदर्शनादिक्रियात्वमितिभावः एवंचोभयोः कृत्रिमत्वेन ग्रहणापत्तिरिति हेतुरयुक्त इत्याहेदमिति। एतेन विपरीत रत्नाकररघुक्तिः परास्ताः
मूलायुक्तत्वप्रतिपादनायाह। हेतुमतीति। ह्रीप घस्य गतिबु...द्धीति सूत्रविषयकृत्वा सामान्यपदानि विशिष्य ते योजयति। णिजिह्या दिना णिचो याप्रकृतिर्धा
तुस्तदर्थक्रियया मित्यर्थः स्वातें व्यादिस्य कर्मत्वप्राप्तौ हेतुत्व प्रतीतेरप्राप्तात्वान्त्येति। ननु तर्हि नियमस्य तत्र हेतुत्वं स्यादत आह। कर्मसंज्ञेति। उभयो रप्यसंभवा

तत्र न हेतुत्वं किंतु तत्रैव तथाच कर्मत्वं प्राप्तावपि उभयहेतो स्तेनाभिधीयत इत्यर्थः। तथाचावशेषे बोध्यः। ननु स्वधर्मेणेत्यस्य कर्तृधर्मेण कर्तृत्वादिनेत्यर्थे न त

त्तत्र

तीयवेति कथं त ध्यमत आह॥ स्वधर्मेणेति॥ तथाचसाफलितोक्तिरितिभावः। मूलेऽतरंग त्वमुपपादयति स्वकारकेति॥ ननु चंविना हेतुमतीत्यादिहेतो स्तत्व

ता

स्य कर्तृत्वसिद्धो बाधितत्वं यदित्वपजीव्यत्व साधकोयं ग्रंथस्तत्वं तं एवेति पुनरुक्तमेव बाधिकोयं ग्रंथो अत आह। विशिष्टायाइति॥ स्वकारक विशिष्टायाणिजर्थे
नसंबंध इत्यर्थः॥ मूलेतएवेति॥ उक्तहेतोरेवेत्यर्थः। कर्तुरीप्सिततमस्य कर्मत्वेन केचित्वपि बोध्यं॥ एवंचेति। अंतरंगत्वसत्वे चेत्यर्थः। तदेवाह। तत्र हीति
आकडारसूत्रभाष्ये हीत्यर्थः उक्तमित्यत्रान्वयः। कर्मेति। प्रथमांतो अपिः कर्मसंज्ञासमुच्चायकः तदेव विशदयति॥ आरंभेति। कर्तृसंज्ञेति॥ प्राक्कडारात्परंका
र्यमितिविधिनेतिभावः तावतापिकथं तल्लाभोत आह। तत्रेति। उक्तभाष्य इत्यर्थः॥ इत्यर्थमिति॥ अयंच विधिपक्षे एव संभवति नान्यथेतिभावः। अभिमानः
मन्यत इत्याभ्यां सूचितारुचिस्तत्वुपदमेव स्फुटीभविष्यति॥ मन्यतेइति॥ मूलकृत् अयंभावः॥ यद्यपि शब्दशास्त्रे शब्दप्रधान्यस्येव मुख्यत्वयांत रंगोप

॥५८॥

जीव्य कर्तृसंज्ञापेक्षया प्रधानानुरोधित्वेन कर्मसंज्ञैवोचिता तथाप्युद्देश्यत्व लक्षणार्थ प्राधान्यस्य प्रयोज्यव्यापोर सत्वे नांतरंग त्वोपजीव्यत्वयोश्चाधि
क्येन विध्यर्थ त्वस्यैवोचितत्वमिति। हेतुमतिचेति सूत्रभाष्यविरोधात् यथाश्रुत मूलमयुक्तमपि सिद्धांतरीत्या योजयति। तुनेति॥ एतेनपूर्वग्रंथोप्यतज्जातीय

स्तथेति सूचितं। अत एव तत्राभिमानः मन्यते इत्युक्तं। एतेन तथा दं ऊयाद्युक्तमपास्तं॥ शाद्व प्राधान्यस्येति॥ शाद्व शास्त्र त्वात्प्राधान्यस्यैव सर्वतो बल त्वादिति भावः
ननु यथा प्राधान्यद्वयं तत्रास्ति तथोपजीव्यत्व सहितं तदत्रास्तीति तुल्यमत आह। किंच कर्तृ ग्रहणमिति। तस्य योजक इत्यत्र तत्पदेन परामृष्टमित्यर्थः स्थिरं विवक्षितः
इह च कर्तुरिति सूत्रे इव तत्राप्यावश्यकमित्यनुपदमेव स्फुटी भविष्यति। युक्तं चैतत्। प्रधानशास्त्र बाधापेक्षया लक्षणायाः पदनिष्ठत्वेन लघुत्वात् तदाहेत्यत इति। न
स्याऽऽवश्यकत्वादित्यर्थः। न चैवमप्यसंगतत्वं तत्र सत्वेन तुल्यत्वमेवेति वाच्यं। लोके प्रधानराजकार्यापेक्षया मंत्र्यादीनामंतरंगस्याप्याल्पकार्यस्याकरण दर्शनादंत
रंगा[illegible] दपि प्रधानकार्यस्य बलवत्वात्। प्रधान कार्यं सर्व तो बलवत् वद्दिया कडार सूत्रे कैयटे स्पष्टत्वाच्च। किंचार्थप्राधान्यनिबंधन कार्यस्य प्राबल्ये आदनादेरपि
कर्मत्वानापत्तेः विक्लित्त्यादेरर्थ प्राधान्यमादाय कर्तृत्वस्य दुर्वारत्वात्। किंचैवं रात्रः पुरुष इत्यादाव प्रधानाद्वे षष्ठीन प्रधानादिति भवतु सिद्धांतासंगतेरिति रत्नाकर
कृत्। अत एव प्रकांतो नियमपक्ष एवोक्तो न तु स इतिदिक्। न न्वेवमुक्तं भाष्यासंगतिरत आह। आकडार इति॥ न नियमेति। नियमशास्त्राणां विधिरूपेण प्रवृत्ति
रिति सिद्धांतादिति भावः प्रस्तुत न साठे विधित्वसंभावनैवेनेत्याह। किंच परमिति॥ विरोधाभावादिति॥ पूर्वेणापवादेन निवर्तितस्य परकार्यस्य प्रवर्तकेन प्रा
कडारादित्यनेन निरवकाशं पूर्व कार्यस्य निवर्तयितुमशक्यतया एकसंज्ञा नियम राहित्येन चाविरोधाभावादित्यर्थः सर्वत्र णिजंतमात्रे। अस्य गतिबुद्धीत्यस्या चि
तेति॥ अत्र नियमे ण्यंतधातोः पाचयत्यादि प्रयोज्यानां कर्मसंज्ञा व्यावृत्ता व पि गत्यर्थादि प्रयोज्यस्य संज्ञाद्वय प्रसंगस्तदवस्थ इत्ययं पाठो न युक्तः अन्यदे
त दोषोद्धारायैव तत्पठितं दंगीकारे विपरीतनियमे शंकते। एषामिति॥ गत्याद्यर्थानामित्यर्थः योगे कर्तुरिति शेषः एतेषामणौ कर्तॄणां यदि भवति तर्हि कर्म
संज्ञैवेति नियमाकार इति भावः इति शास्त्रेति। प्राक्कडारात्परं कार्यमिति शास्त्रेत्यर्थः। तेन नियमेन कर्तृ संज्ञा व्यावृत्तापरकार्य विधानाभावात्। तथा च नि
यमांतरे तद्बाधेनैवोपपत्तौ वचनं न दोषो नन्याय्यः किंच पाचयत्यादि प्रयोज्यस्य संज्ञाद्वयापत्तिः तस्मात्तथा नियमो न अत एव न्यासांतरेण समकृति

स्व

य

त म

न

तेति भावः ननु सिद्धान्तेपि तेभ्यो यदि णौ सति कर्म भवति तर्हि प्रयोज्य एवेति विपरीत नियमः कुतो न उदाहरण प्रत्युदाहरणयोरनिष्टं शिष्टमेवेति चेन्न ण्यन्ते कर्तुश्च
कर्मण इति वार्तिकात् सूत्रे कर्मक ग्रहण वैयर्थ्यापत्तेश्च आवश्यकत्वाभावात्। सिद्धान्ते तु पाचयत्यादि योगे नियमात् कर्मत्वाप्राप्तौ पच् धात्वर्थ निष्ठविक्लेद्यतानिरूपित
प्रकारता नाश्रयत्व रूपं प्राधान्यमादाय कर्तृत्वात् तृतीयेति दिक्। चेदमिति॥ तत्पाठेपि नियमार्थ त्वमित्यर्थः तन्नैव। आकडारादिति सूत्रभाष्य एवेत्यर्थः। ननु त
थायुक्तमित्यनेन न सिद्धः संज्ञा न युक्त अत आह। तथेति॥ तस्य स्वर्गस्य स्वर्गादीनामीप्सितत्वात्। ननु प्रयोजक व्यापारस्य न तदुद्देशेन प्रवृत्तिरिति प्रागुक्त मीप्सि
ततमस्येवात आह। तत्रापीति। तथायुक्तमित्यत्रापीत्यर्थः कर्तुः क्रियया तथा युक्तमिति तदर्थ इति भावः। ननु लक्षणां विनैतस्य णिजन्ततां लक्षणां विने
तिनार्थः। तेषां तदनुपयोगात् नापि तत्प्रकृते स्वांविनेत्यर्थः णिचो वाचक [illegible] त्वात् कर्तृ पदस्य तु तत्र लक्षणायाः प्रागनुक्तत्वात् अत आह। कर्तृपदस्येति
। कर्तुरीप्सिततमिति सूत्रस्थस्येति भावः तत्प्राचोपलक्षणमिति। प्रागुक्त लक्षणया बोधकमित्यर्थो बोध्य इति भावः तदावश्यकतामाह तत एवेति। तस्य तत्रतदं
गीकारादेवेत्यर्थः। दुह् धातो विभागानुकूल व्यापारार्थः यद्यपि प्रकृत धात्वर्थ प्रधान व्यापाराश्रयत्वात् कर्तृत्वस्य विभागावधित्वादपादानत्वस्य च सार्थं प्राप्तौ स्य
वपादानमुत्तराणीति परत्वात् कर्तृत्वेन तृतीयोचिता तथापि अपादाने या पंचमी तदंतात् सति स्वरूपे विरुद्ध संबंधेनेत्यर्थकेन ग्रामाद्ग्रामन्तो गच्छतीति त
क्ष्यकेणापादाने चाहीयरुहोरिति सूत्रेण कर्म प्रत्ययान्त हाको वेत्यपादानत्व ज्ञापनात् पंचमी सार्थेन तेन रत्यर्थकोयं प्रयोगस्तदाह। कर्तुरिति। कैयट इत्यनेना ज्य
र चिंस्तिता। लक्षणां विनापि प्रागुक्त रीत्या सिद्धिः किंच हीयत इति कर्तरि तः जहातिश्चापगमनार्था सार्थश्चैत्रं जहाति अन्न लाभादिना अपगमयतीत्य
र्थः कर्मणः कर्तृत्व विवक्षायां चैत्रः स्वयमेव हीयते, घ्यंगच्छती त्यर्थः अपगमने अवधित्वाकांक्षायां सार्थे सान्वय इतीति केचित्। उक्त दास्तीय प्रागुक्तमपि
समूलयितुमाह। तत्प्रयोजक इति। एवमेव कर्तृ परार्मेक [illegible] तत् पदं स्वत त्रलक्षकमेव कर्तुरिति सूत्रे वक्ष्यमाण रीत्या तया विना निर्वाहेपि तत्र तदावश्यक

र्श

था

माह्। अत एवेति णिजिति। सर्वत्रेति शेषः अन्यं प्रयोजक समभिव्याहारे तस्य सर्वत्र कर्मत्वेन कर्तृत्वाभावेन हेतुसंज्ञाया अभावेन हेतुमतीति णिच् क्वापि न स्यात्
तथा च तद्बाधापत्तिरिति भावः कर्तुरिति सूत्रेन तदस्य लक्षणं विना तदिष्टसिद्धिमाह। किंचेति। प्रयोज्येति। लक्षणे जन्यत्वं साक्षात्परंपरासाधारणं निविष्टमि
ति भावः इदमपि कर्मत्वमभिप्रेत्योक्तं वस्तुतस्तु दूषणं न स्यात्। किंचेति॥ कर्तृत्वेति। प्रयोज्यत्वेनाभिमतस्य विशेषः तत्कर्मके हि गमने तत्प्रेष्यते स्पष्टं चेदं प्रक्रा
श इति भावः नन्वकृतेति न्यायेन तदा तन्न स्यादत आह कृतेति। तत्रादौ कैयटादिरीत्या हेतुनियममिति। सिद्धान्तरीत्याह। नास्येवेति ननु याप्रापणे इत्यादेरपि
तस्य तथापि गत्यर्थत्वमेवात आहोत्तरदेशेति हि। तदिति॥ यत्प्रापणमित्यर्थः। गतिस्तूत्तरदेशसंयोगानुकूलव्यापारमात्रं यातेरपि तावन्मात्रवाच्यमिति।
तस्य गत्यर्थत्वमेवेति भावः ननु तथापि न ह्रणे किंमानमत आह अत एवेति। नीवह्योर्नेत्यस्मादेव प्रतिषेधादित्यर्थः। यथाकथंचित्। विशेषणतया अपि नावि
शेष्यतया तदर्थपरिग्रहः अत्र गतिबुद्धीति सूत्रे अत एवाणीति सफलं अन्यथा णिच्प्रकृतिकण्यन्तस्याधिकार्थत्वेन गत्याद्यर्थत्वादप्राप्तौ किं तेनेति भावः। सि
द्धान्तरीत्या मूलं योजयितुं यथाश्रुतमूलं खण्डयति। नवेति खादिसूचितमित्यं तेनाभ्यवहृति। पूर्वकत्वाभावात् अभ्यवहारयति सैन्धवान् तेर्वे स्वमिति भावः
मात्वसित्वं द्वेधदलत्वेन वेति शेषः उदाहरणादित्युक्तादि पञ्चम्यन्तचतुष्टयानां गत्यर्थत्वेन तेषां ग्रहणमित्यत्रान्वयः। प्रापणार्थस्य गत्यर्थत्वे तु हरति भारमि
त्यत्र वहतीति प्रतीयात्तत्वेन गत्यर्थत्वात्तत्राप्यात्तत्संगतिः स्पष्टैवेति भावः विपूर्व इति हरति ग्राममित्यादौ गच्छतीत्यर्थावगमात्केवलस्य तत्त्वे तु विपूर्व इति वि
अ नवदेहिति भावः। अभ्यवपूर्व इत्यत्र हरतीतिरित्यस्यानुषङ्गः तत्रस्येति तत्सूत्रस्थोक्तभाष्यस्येत्यर्थः तदेव साधकान्तरमाह गत्येतीति। अप्रतिषेध इति। प्रतिषेधो
नेत्यर्थः। एवं न गत्यर्थत्वारतिः। अत एव हरतेर्हिंसार्थत्वाद्गत्यर्थत्वाप्राप्तिरिति कैयटेनोक्तं अन्यथा भाष्यकैयटयोर्न्यूनतापत्तिरिति भावः। नन्वेता
२ वताहरतेस्तु तथा वहतेस्तु तत्र किंमानमत आह। तत्रैवेति॥ नगतीति सूत्रे एवेत्यर्थः। उक्तवार्तिकस्थवहिग्रहणखण्डनेन विशेषः तस्य तत्त्वाभावे हेतुमाह

शं

दे[illegible]न्तरेति तेषां यथा कथंचिदित्यर्थीनां विहस्य[illegible] इत्यादीनां। उभयत्रार्थग्रहणादिति भावः बहुवचनेन तुल्यन्यायात्र यतेरपि तथा सूचितं नागेशरवमंजूषा[illegible]दिकं तु
मतान्तराभिप्रायमिति भावः। गतेर्विशेषणत्वमपि तत्र नास्ति यतः प्रापणं न प्रागुक्तरूपं किंतु प्राप्त्यनुकूलव्यापारानुकूलव्यापारमात्रं तदाह। प्राप्तिश्चेति॥
मात्रशब्दः कार्त्स्न्ये सुखं प्राप्त इत्यादौ। समवायस्वस्वामिभावादीनां भानादिति भावः धनमित्याद्देशान्तरस्थोपीत्यादिः नन्वेवं कर्मत्वेन भूः प्राप्ति त्यादि सिद्धा
यपि गत्यर्था कर्मकत्वप्राप्त्या सुखं प्राप्त इत्याद्यसिद्धिरस्तत्रापि स्यात् गत्याक्षेप इति संयोग एवतदर्थः कुतो नेयत आह तदीति। चस्त्वर्थे॥ नन्वेवं निषेधवार्ति
कासंगतिरत आह। देशान्तरेति। परं केवलं सुखं प्राप्त इत्यादावभावादाह। क्वचिदिति। ग्रामं प्राप्त इत्यादावित्यर्थः तादृशं नान्तरीयकतया गतिबोधकत्वं। अपि रूप परा
मर्शकः अभिमतस्य अभिमानेनांगीकृत्य तदुक्तं भाष्याद्यसंगतिरत अभिमानसूचितारुचिं तत्र सूचयन्नाह। वस्तुत इति। प्राप्तिरिति। कर्मत्वस्येति शेषः वार्त्तिकं तु न्या
यसिद्धार्थानुवाद एवेति भावः। अनेन प्राप्तिमत्वेत्यनेन। अन्यथेत्युक्तिरफलैव एतावन्मात्रेण प्रतिषेध उक्त इत्येव वदेत्। सूत्रे, णीतीति निवृत्तप्रेषण प्रकृतिक ण्यंता
[illegible]ण्णिचि आपण्यंत कर्तरि कर्मत्व वारणाय। एवं मूलयोजनेपि तथा प्रकाशरत्नाकरदंड्याद्युक्तमपास्तमिति भावः स्पष्टत्वाल्लक्षणा न त्यादिति भावः ननु मूलात्
प्रतिग्राहितगंधमाल्येति समस्तेन जायाशब्द समासः प्रतीतेन त्रिंश वक्ष्यमाण दोषादत आह स्येति। नन्वेवं व्यधिकरणहाऽत्रिपद बहुव्रीहिर्दुर्लभो त आह। तत्रे
ति। तत्र घटितवाक्ये इत्यर्थः। कृतेति। तस्य गंधमाल्यशब्देनेति शेषः। एतेन त्रिपद बहुव्रीहिं कुर्वन् रत्नाकरदंड्यादिरपास्तः ननु यथाश्रुत सामंजस्ये किमर्थं शे
षोऽत आह। बहुव्रीहिणेति। कृत बहुव्रीहिणा प्रतिग्राहित[illegible]गंधः सगंधमाल्य शब्देन जाया शब्दस्येत्यर्थः ननु सुप्सुपेति विधायकमत आह। अवयवेने
ति। प्रतिग्राहित इत्यनेनेत्यनेनेत्यर्थः क्रियाकारकयोर्नित्यसाकांक्षत्वादिति भावः समुदायेन प्रतिग्राहितगंधमाल्या शब्देन तदीयांतस्य तस्य मध्यमणिन्याये
नान्वयः अवयवद्वारकं समुदायेन सामर्थ्यमिति तगतिक गतिरिति भावः मूलं खंडयितुं शंकते। नन्विति। बोधनान्यार्थग्राहेरिति शेषः विवक्षायामिति सं

(margin notes: य, ने, द्र, अ, च, तं, अ)

॥५६॥

बंधित्वविवक्षायामिति शेषः इष्टसिद्धिरिति। अयं भावः गंधश्च माल्यं च गंधमाल्ये इति द्वंद्वः समासे आरोपितसंख्याभाने मानाभावात् प्रवृत्तिनिमित्तयोरेकत्वा
च्च द्विवचनं अत एव दारोजसी द्व्येकयोरित्यादि प्रयोगाः संगच्छंते। ततो जायया प्रतिग्राहिते इति तृतीया तत्पुरुषः ततो जायाप्रतिग्राहिते गंधमाल्ये यस्या इति ष
ष्ठ्यर्थे बहुव्रीहिः तस्यास्तत्त्वाविवक्षायामपि धात्वर्थः स एवेति द्वितीय कर्माभावात् ण्यंते कर्तृत्वस्य सत्त्वात्प्राप्तत्वात्तत्रैव तेन तयोस्तत्त्वा बहुव्रीहिरुक्तरूप इती
ष्टसिद्धिरिति। हेतुत्वेति। हेतुसंज्ञेत्यर्थः॥ अत एवाह। हेतोश्चेति। रूपत्वेनेति धर्मपररूपांतरपदबहुव्रीहेस्त्वप्रत्ययेनोक्तस्योभयत्रान्वयः कर्तृत्वार्थी कर्तृसंज्ञा
संपादनार्थं। आवश्यकेति। अन्यथा णिजंतस्यादित्यभावः नतु तत्त्वविवक्षया कर्तृत्वेप्यफलाश्रयत्वात् कथं कर्मत्वं तस्यात आह। दृष्टार्थेति। तादृशव्यापाररू २
पार्थस्यैवेत्यर्थः तत्कर्मेति। धेनुकर्मसंज्ञेत्यर्थः दृष्टा विषयो कर्तुः कर्मत्वविषयो न तु कर्तृत्वकर्मत्वशक्त्योरन्यतरान्यतरसति प्यन्यतराविवक्षा सूपपादा तत आह।
कर्मत्वेति॥ अपि मिथः समुच्चायकः। तत्समेति। कर्तृत्वशक्तिसमनियतत्वेनेत्यर्थः अभिमानादित्यनेनारुचिः सूचिता तद्बीजं तु शक्त्याभेदेन तथा संभव
दृष्टं चेत्तदन्यत्रापीति। तदेवं तदर्थे कर्मत्वाविवक्षायास्तद्दीशासंभवेपि सोऽर्थ एव नेत्याश्रयेन शक्यते। न चेति॥ प्रतिग्रहेति। प्र[illegible]ति। पूर्वयद्धातोरित्यर्थः
अपादानमात्रार्थकादित्तिभावः एवं न धेनोः कर्मत्वाभावेन तत्रत्य निवृत्तिः। अत्र पक्षे हि तत्प्राप्तिरेवाभावः नन्वेवं णिजंतस्यादानानुकूलव्यापारार्थत्वेन
प्रतिग्राहिते स्वीकृते गंधमाल्ये यया इति प्राक् बहुव्रीहौ प्रागुक्तरीत्या जायापदेन समासो न स्यादत आह। जायेति। एकदेशान्वयाच्चास्या पंचमीसमासायुक्त
त्वादाह षष्ठीति॥ विशिष्टेनान्वय इति भावः। प्रकृतेष्वेवेति। तथा सति ह्यादिः प्रतिग्राहितेत्यस्य विग्रहे इत्यादिः। अन्यपदार्थे तीति॥ एतेन वैपरीत्ये त्वेवं सत्रे
वकारोऽव्यर्थ इत्यपास्तं। तद्वैपरीत्यानंगीकारे तु सूत्रोपात्तान्यपदार्थप्राधान्यं दुर्वचं धेनुकर्तृकं जायानिष्ठप्रेरणविषयीभूतं यत्प्रतिग्रहणं तत्कर्मीभूते
गंधमाल्ये इति विग्रहार्थात्। अत एवैतस्योपमानत्वेन निर्देश इत्यभिप्रायः। तदंतरिति। अन्यपदार्थस्य तद्वैपरीत्यस्य चांतर्भावेणेत्यर्थः। सूत्रेति। सूत्र

स्यसुसत्यादेश्चबलेनेत्यर्थः स्फुटीभविष्यति चेदं समासप्रकरणे तत्स्वीकारे बहुव्रीहिस्वीकारः। अयुक्तं मूलं योजयति व्याख्यानादिति सर्वेविविशते इति भाष्य
प्रयोग मूलकादिकादित्यादि॥ अयं भावः॥ अभिनीति द्वंद्वः तदंतस्याप्यव्ययत्वेन पंचम्या लुक्। अभिनिपूर्वो वि[illegible]ति मध्यमपदलोपि समासो वेति तदाह। संघातेति
बीजाभासमिति। प्रकाशाद्युक्तमित्यर्थः। अत्रारुचिबीजं तु पूर्वनिपातप्रकारस्यानित्यत्वं प्रत्याख्याने मूलं सूचयन्नाह तत एवेति। नैषधपद्ये तदभावस्पष्टत्वादेवेत्यर्थः
भाष्यप्रयोग इति। योनो गुणेति सूत्रस्थ इति भावः अभिनिवेश आग्रहः सन्मार्गविषयकाग्रहवानित्यर्थः वैषयिकश्चाय माधारः॥ समर्थेति॥ एवं चाभिनिविशस्यानुपू
र्व्यविरुता यत्र श्रूयते तत्रैव तत्सूत्रप्रवृत्तिरिति न दोष इति भावः परम मूले कैयटानुसारि प्रकाशानुदितं तु न युक्तं, तदनुवृत्तौ तस्यांस्तत्वेच मानाभावात् एवं च तथात्वे
कादंज्याद्युक्तंचिंत्य मिति बोध्यं। ननु नित्य मिति। विभक्तसूत्रविहितो[illegible]यः स्वार्थिकत्वेनांतरंगत्वादत्तिविषये पूर्वमेवा यत्तो ततउभयशब्दात्तसिर्विहितत्वेऽपि नो
भशब्दाद्विधानमित्युभयत्रैव सा रिष्युक्ते मत आहो भाष्य इति॥ समु[illegible]ति॥ उभयेत्यर्थः। तथा चोभयनिष्ठं प्रकृतित्वमुभशब्दे आरोप्य तत्प्रकृतिकत्वं षष्ठ्यर्थ इत्यर्थः उभ
यशब्दस्सर्वत्र प्रकृतिक तत्संतयोग इति तदर्थः नन्वेवं वार्तिके वृत्तिविषयत्वसहादर्यस्यादत आहाभेति॥ शब्देति॥ तथा चासंख्यावाचित्वमिति अभिव्यक्तं तिन्या
येन सत्त्वेति भावः॥ विषयेपीति॥ धर्मपरो निर्देशः यद्योभशब्द इति शेषः। उभयतः कृष्णमित्यादौ लक्षणं योजयति॥ उदाहरणे त्विति॥ अंतरंगत्वादित्यस्य स्वार्थिकत्वे
नेत्यादिः ततः तस्मात् यद्यातदनंतरं। नन्वंतरंगत्वेन प्राक्प्रवृत्तौ प्रसादकाराद्युक्तौ वस्तुतस्त्वित्यादिना मूलदोषात्तिरयुक्त्या, तआह। वृत्तौकृतायामिति॥ ननु नायं
मूलादिसिद्धांतोऽ तआह। प्राचीनैर्हीति॥ यतः प्रसादादिभिस्तथा व्याख्यातमतस्तथार्थो बोध्यः। तदाहेति। तदनुसारिणाहेत्यर्थः। एवं च प्राचीनरीत्यैव प्रा
चीनग्रंथदूषणं तस्वरीत्येति भावः॥ अतएव तत्फलितमाहैवं चेति॥ तत्र तथा व्याख्याने तत्ङ्गीसा यथाश्रुत सा घुत्वे चेत्यर्थः तेषां प्राचीनानां अनेन स्वमते त
दावश्यकत्वं ध्वनितं। तद्योक्तमेव प्राक्। व्यर्थमिति। अन्यथा पूर्वापरविरोधस्तेषां तथा व्याख्यानत्यागेन लक्षणाश्रयणे तु मन्मते प्रवेश एवेति भावः। यथान्यां

य
मसंगत त१
अन्य नुवृ विभा
चू

114

तरंगतात्प्राक् प्रवृत्तिस्तथोभशब्दे प्रपंचितं। प्रकृतिद्विलेन तसारिलिद्विलनिर्देशः एवंचतथारत्नाकरदंड्याद्युक्तमपास्तं। नन्वव्ययत्वात्सुपो लुक् श्रूयमाणविभक्ति
तरंगतात्प्राक् प्रवृत्तिस्तथोभशब्दे प्रपंचितं। प्रकृतिद्विलेन तसारिलिद्विलनिर्देशः एवंचतथारत्नाकरदंड्याद्युक्तमपास्तं। नन्वव्ययत्वात्सुपो लुक् श्रूयमाणविभक्ति
कमित्यर्थकलया विभक्तिकमिति प्रसादप्रकाशादिग्रंथनिर्वाहे मूलमयुक्तं। नचतत्र नतथाव्यवहारः नलोप प्रातीनिसूत्रे नेत्येतदविभक्तिकमित्यादि हरदत्तादि
व्यवहारदर्शनात अत आहानुसन्नेति। तत्रैवमानमाह। दृष्टांतेति॥ तदभिप्रेत्येति॥ अनेनारुचिः सूचिता तद्बीजंतु दृष्टांतएवोक्ताशयकः प्राचांग्रंथः व्याख्या
त्रभावश्च तथाव्याख्यानाभावश्चेति। रत्नाकरोप्येवं एवंचमूलादिचिंत्यमिति बोध्यं। ननुनातिदेशेन लुक् संभवतिविभक्त्यंतस्यानुकरणत्वाभावादत आह तिदे
शेनेति॥ ननुभ सर्वतसोरिसत्रपरसाह चर्यात्तसिलेव गृह्यते इत्यादि वात्तसि रीति मूलमयुक्तं मत आह कृतेति॥ एवंचमूलादिप्रकाशाद्यनुरोधेनेति
भावः। यत्तुरत्नाकरदंडि प्रभृतयः अपादाने चाहीयतीति तस्य तसेश्चेति न सिलादेशोदृदरूपं न तथोक्तं युक्तः तेन तत्र किंसर्वनामसाहचर्यात्र संसायां त
सिलोऽभावस्तद्योगे द्वितीयान किंतु षष्ठ्येवेति तत्रपंचम्यास्तसिलिस्यैव सिद्धेतावता रवाश्रयणस्य निर्बीजत्वापत्तेः तदेतत् ध्वनयन्नाह॥ पंचम्या इति॥ ननुस
मानाधिकरण्ये नसस्याभेदेन सर्थः नत्वन्यः इष्टासिद्धेः सचायुक्तस्तस्यात्त्वादत्वादत आह॥ विनापि संबंधमिति॥ तद्विशेषमित्यर्थः षष्ठ्याः शब्दरूपत्वे नसव
धाजनक त्वाहाभेदेति॥ स्वस्वामिभावादीत्यर्थः अयमेव वैयधिकरण्यपदार्थः ननुनाम्नोरिवुपलक्षणंवाव्यतिलुनीहि लुनीहीत्येवायं लुनाति पुरीमवस्कंदद एधां
चक्रे कृष्णं नमेत्तुस्वं यायात इत्यादौ तथासंबंधान्वयस्येष्टत्वात् तथा चक्रियाकारकयोरपि संबंधे विध्यापत्तिरत आह नाम्नोरिति॥ तथाचतेन संज्ञा
तीयमेवोपलक्ष्यतइति क्रिययोरेव ग्रहणं नक्रियाकारकयोरितिभावस्तदाह। क्रियेति॥ क्रियाकारकभावरूपा कारकसंज्ञानिमित्तकविभक्तिं द्वितीयादि वा
व्यायाः संबंधस्तेनेत्यर्थः। तथाचे कवि धएव तत्रसंबंध इति भावः। मूले तदपवादेति। अतएवोपपदविभक्तीनां संबंधोर्थः विशिष्यार्थानुक्तेश्चेति भावः नन्वेवंत्रि
धेसुचित मत आह। मूले द्वि धेयुक्तिरिति॥ ननु रक्षोक्तो वैयधिकरण्यस्यानुक्तेः कथंतेन निर्वाहो तत आह। षष्ठ्यावेसे तदिति॥ तथाच तदर्थस्योक्तं तयात दप

११५

ते

वादविभक्तेरपि संग्रह इति भावः । तद्रूपलक्षणेभानाभावादाह । मूले षष्ठीति ॥ व्रजानि देवदत्तेत्यादौ अजनक्रियायां तदन्वयाभावस्य वस्तुतस्त्वित्यादिना प्रतिपादितत्वादाह
बाधनीयेति ॥ विधेये सत्यर्थः । नन्वेवमपि धिक्शब्दयोगस्तस्य कुतो नेत्यत आह ॥ संबोधनेति । क्रियेति । विधेयक्रियेत्यर्थः एवमग्रेपीति । बोपीति ॥ संबोधनेनापीत्य
र्थः । अपिस्तत्स्थाएव समुच्चायकः ॥ अयंभावः ॥ निषिद्धाचरणमित्यस्य आनाहीत्यस्य चाध्याहारेणाभिमुखीभवन्मूर्खो देवदत्तः निषिद्धाचरणादिसंबंधि निंदाकर्मक
प्रवर्तनाविषयो ज्ञानमिति वाक्यार्थस्तथा च ज्ञाने एव तद्योगः एतेन येषां धिक् कृष्णाभक्तमित्यादौ प्रथमार्थे द्वितीया निंद्यः कृष्णाभक्त इत्यर्थः तन्मते मू
र्खसंबोध्यकं निषि द्धाचरणादिनिंद्यमिति वाक्यार्थ इति प्रकाशरत्नाकरदंउपायुक्तं तदाशयकमेव मूलोक्तं चापास्तमिति । नहीत्येवाह । तत इत्यादेरिति ॥
नन्वेवं हे इत्यस्यानन्वयापत्तिरित्यत आह । हाथेति ॥ स्वदार्यकस्येति भावः ॥ मामित्यस्याध्याहृतेत्यादिः तत्संबंधी मत्संबंधी वा स्वेदइति तदर्थः तथा च भिन्नमेवेदं
वाक्यमिति भावः संबोधनस्य कारकविभक्तित्वस्य प्राक् प्रतिपादितत्वादाह ॥ कर्तृकारकेति । तथैवोपक्रमोपसंहारादिनालाभादिति भावः ननु तस्य कारकत्वे
कर्तृत्वमपि स्यात्पादमत आह । संबोधने [illegible] तस्यादेव्यस्य तथैवकृतीलेस्तत्वेनैव तत्रान्वयात् । अतएव वैशेषिक्यः कारकविभक्तयइति सिद्धांत
इति भावः । वस्तुतस्तु ननियामकमित्याह । हास्तवेति ॥ ×८श्लो० निदेवतं प्रसीदेत्यादाविति भावः । तमिसनेन । तमित्यर्थेन । अभेदेपि । फलिताभेदेपि । अतएवा
ह । शब्दत इति ॥ संबोधनपदार्थेतिशेषः ४ ×श्लो०५०×८॥ बहुपल्लवइति ॥ वचनपुरुषाद्यव्यवस्थापत्तिरूपइत्यर्थः ॥ ननु संबोधनस्य कर्तृकारकत्वव्यवहारोपि
प्राक् प्रतिपादितः स्पष्टतरश्च मंजूषायामत आहेतिभावइति । एवं च मूले तथादर्शयुक्तं चिंत्यमिति यत्ताइरिति प्रकाशोक्तिर्युक्तैव । एतेन प्रकाशोक्ति
न्यासमाधाय यत्तु संबोधनपदं कर्तृकारकवाचीत्यत्र रंगहास्यधमेति केचित्तन्न । देवप्रसीदेत्यादौ तस्य वास्तवकर्तृत्वेपि कृष्णं त्वां भजे गच्छं तु चैत्रा कृष्णेत्या
दौ तदभावादिति न्याः द्वंद्वघटितत्वस्य रूपाश्रयणत्वे तदपि सुवचं यदपि तं वे इतीत्यध्याहारात्कर्तृत्वं तत्राप्यस्त्वेवेति कश्चित् । तदपि न तथाहि सत्येव लिङ्वाक्य

व

॥५८॥

मिति समानवाक्यत्वाभावात्तत्र निपातानापत्तेरित्यादि रत्नाकरोक्तमपास्तं । तथा प्रकाराभावेन तथानुवादस्यायुक्तत्वात् । तस्या वाचनिकत्वेन तदर्थाभिप्राप
यत्वस्यापि दुर्वचत्वाच्च । उक्तरीत्या प्रकारसौष्टवे द्वंद्वघटिततत्पुरुषाश्रयणे निर्बीजत्वाच्च । किंत्वध्याहारेपि प्रागुक्तरीत्या निपातस्य सिद्धत्वाच्च । द्वितीयस्याध्याहा
रोचित्यात्वेतिदिक् । ननु प्रथमसमाधाने नैव सिद्धे द्वितीयसमाधानोक्तिर्मूले निष्फला । किंच बुद्धीनां इनाः श्रेष्ठा बुद्धीनां तामिति द्वितीयांतमेव तत्सुवचम् तत आह तत्
चेति ॥ द्वितीयसमाधानं गीकारादेवेत्यर्थः तदेवोपपादयति । अत्रहीति । उक्तवाक्यहीत्यर्थः । अतिशायइति ॥ ननु उपर्युपरिलोकं हरिरित्यादा विवक्षितरूपो पर्यादेः स
मीपार्थे देशादिः इति तमर्थः प्रतियोगित्वरूपः संबंधो द्वितीयार्थः लोकप्रतियोगिक समीपोर्ध्व देशवृत्तिरित्यादिक्रमेण बोधइतिभावः अतिशययुक्तांइश्वरबु
द्धयश्चरंतीति हितदर्थः ॥ अतएवाह वीप्सेति । चरत्यर्थे । सर्वसंबंध्यतिशयितममत्वानमयं वर्तते इति वाक्यार्थः ॥ ननु बुभुक्षितं न प्रतिभातीत्यादो इत्थंभू
तारव्यानत्वेन कर्मप्रवचनीयत्वेन [illegible] गत्यर्थता तत आह उपसर्गा इतीति तदुपपादयति ॥ बुभुक्षितान्निवर्तीति प्रत्ययार्थस्तत घोत्य । झटिति । स्फूर्तिता
परपर्यायः प्रतिभात रूपस्तत्संबंधस्य भानक्रियागतत्वात् ननु बुभुक्षितगतत्वादित्यर्थः तमेवसंबंधं दर्शयति ॥ बुभुक्षितेति ॥ प्रतेर्घोतकत्वाद्धातोरेवसो

भाना

न

र्थ इति धौयितुं प्रतेरनुल्लेखः कर्मप्रवचनीयत्वेनतु तदुल्लेख आवश्यकः क्रियानिरूपितसंबंधविशेषघोतकत्वस्यैव तत्त्वात् अतएव तत्प्रभावात्तदभावः तथाच
प्रतियोगइत्यस्य प्रतियोग्यर्थक्रियायोग इत्यर्थः बुभुक्षितसंबंधीय न किंचिद्विषयक प्रतिभावइतिबोधः नन्वंतराशब्दस्य मध्यार्थकत्वेपि मध्ये इति कथं त
ध्रमत्तआहान्तरेति ॥ आधेय प्रधान मध्यस्यवर्तते अव[illegible]त्वरूपः संबंधो द्वितीयार्थः सचमध्यत्वान्वयी तन्मदवधिकमध्यत्ववक्षितिहेतुरितिबोधः सूत्रे

धि

मिथः साहचर्यार्थयोरेवग्रहणं गुरुर्भार्गवाविसत्र ग्रहयोरिव ननु टाबंतस्य तृतीयां तयोः हरस्तु न सोपपदेति न्यायात् युक्तग्रहणं तु स्पष्टार्थमिति भावः ।
ननु लक्ष्यलक्षणत्वं यदि ज्ञाप्य [illegible] ज्ञापकत्वं तर्हि वैपरीत्यापत्त्या विद्युत् सदेवत्व द्वितीयापत्तिरत आह ॥ वृक्षे तथाचनोक्तरूपत्वं किंतु ज्ञानजनकत्वान

ति

न

विषयत्वं लक्षणत्वं ज्ञानजन्यज्ञानविषयत्वं लक्ष्यत्वमितिनोक्तदोषः वृक्षदर्शनजन्यज्ञानविषयोविद्युन् विद्योतनमितिबोधइतिभावः ॥ विद्योतैज्ञानादिति ॥
तत्समीपदेशविशेषावच्छिन्नविद्युद्विद्योतज्ञानादित्यर्थः ॥ ननुकर्मप्रवचनीयंप्रत्यकर्मत्वात्कथं द्वितीया ॥ तआह । वृक्षेति ॥ ननुसंज्ञयाषत्वाभावबलद्द्वितीया
पिभविष्यति । उपपदेतिन्यायस्तुफलाभावान्नशाद्बबोधस्तभेदस्तुदुष्परिहारः ॥ तआहात एवेति । कर्मणिद्वितीयांगीकारादेवेत्यर्थः षष्ठीति । कर्तृकर्मणोरि
तिषष्ठीत्यर्थः अन्यथा तन्निषिद्धावपीयं दुर्लभास्यात् शेषषष्ठीतुन अस्यास्तदपवादत्वादितिभावः ननुविषयत्वमपिधात्वर्थेन वाच्यत्वेनवावाच्यं तच्चवी
प्सायामन्यतरस्याप्यभावान्नदुर्वचमतआहान्यथायोत्येति । द्विर्वचनद्योत्यत्यर्थः । अतएवो देश्यत्वेनानुर्लक्षण इत्यादिवत्संज्ञिनां पूर्वनिर्देशः कर्तृत्वे विपरीतोच्चारणं
वीप्सारूपार्थस्यसांनिध्यबोधनद्वारापुनर्विधानार्थं अतएवचवीप्साशब्दस्यपरनिपात इतिभावः इत्थंइति वीप्साधन्येइत्यर्थः तथाच निमित्तत्वद्योत्यत्वा
न्यतरस्वरूपं नन्निविष्टं एवस्येचनिवेशे त्वपरत्वनस्यात्दितिभावः । ननुपरः क्रियासंबंधेन रक्षणासंबंधात्कथं पंचम्यापत्तिकर्मप्रवचनीययुक्ते चकर्मप्रवचनी
ययोगस्तुसंज्ञानिमित्तसंबंधाश्रितत्वमतआह । विशिष्टेति ॥ कर्मत्वोपपत्तये क्रियान्वयस्यावश्यकतया परियात्सर्वनोभावविशिष्टसेचनसंबंधे वृक्षस्य
विशेषणेनापिसंबंधात्प्रयोगः कर्मप्रवचनीययुक्तेच यथाकथंचिदितिभावः वस्तुतोयुक्तमसदित्यादेतत्सर्वमिति ॥ इत्थंवीप्सेत्यादिषत्वं नेत्यंतं मूर्ध्नापसर्गत्वा
भावान्नषइतिपरममूलं चेत्यर्थः ॥ इदन्तेति ॥ उपपद्दविभक्तेरितिन्यायेनात्रकर्मण्येवद्वितीया पर्यादयस्तुक्रियाविशेषकाएवेति द्विनेत्यंतं ॥ कर्मत्वाविवक्षा
यामिति ॥ अयंभावः द्वितीयार्थः कर्मस्वप्रकृत्यर्थतावच्छेदकव्यापकतासंबंधेन तस्यसेचनक्रियान्वयः ईदृशसंबंधद्योतकंचवीप्साद्विर्वचनं द्वितीयाकर्म
ण्येवप्रसादयः क्रियाविशेषकाएव संज्ञाफलं चषत्वं वीप्सायां प्रतिनाव्ययीभावस्तुन प्रतिरवदर्थकत्वात् प्रतिद्वितीयांतयोः क्रियान्वयेनासामर्थ्याच्चेति
प्राचः प्रतिमासमित्यादौ प्रतेवीप्साद्योतकत्वस्यदृष्टत्वेन रक्षंवृक्षं प्रतीत्यादावुभयोरपितत्द्योतकत्वमस्तु नचान्यतरवैयर्थ्यं व्यतिलुनीतइतिवदुपपत्तेः ए

लम

५९

वंच लक्षणादिसाहचर्यं नप्यबाधनं भवति। नचकर्मणि द्वितीया सिध्यान फलं तदविवक्षायां संबंधत्वे नविवक्षायामपि द्वितीया सिद्धेः फलत्वात् एवंच यत्रनद्वि
त्वं केवलः प्रतिरेव वीप्सायोतकः तस्य च क्रियाविशेषकत्वाभावः तत्र द्वितीयार्थ संज्ञायाः साफल्येन लक्षणादि साहचर्य बाधेन विषयत्वपर्यंत व्याख्याने बीजा
रो भावेन मतेः क्रियाविशेषकत्वेन द्योतकत्वे संज्ञाप्रवृत्तौ नमानं नचतादृशस्थले नित्यत्वादव्ययीभावो दुर्वार इति वाच्यं तद्विषये समासे वैकल्पिकत्व वक्ष्यमाणत्वा स्य
दितिमान्याः। अन्येतु कस्य लक्षणादयोऽर्था निर्दिश्यन्ते वृक्षादीनामिति भाष्यप्रामाण्यात् साहचर्यानाश्रयणे नविषयतया व्याख्यानस्यैवौचित्यं। एवंचोभयत्रा
पि द्वितीया। किमिमे सामीप्यादिव वृक्षादीनामर्था उत पदांतरवाच्या अपि विषयतया संज्ञानिमित्तभूता इति प्रश्नः उत्तरपक्षाश्रयेणांतरं वृक्षादीनामितिहि
भाष्यार्थ इत्याहुः। तथाच वीप्सा द्विर्वचन द्योत्य वीप्सापदेन बोधयितुमिष्टा विषयत्वरूपं व्याप्यत्वं बुद्धिस्थ यावत्त्वरूपमर्थनिष्ठमुच्यते। व्याप्यत्व विशिष्ट वृक्षादी
नांच स्ववृत्ति व्याप्तिः प्रत्यर्थं शब्दनिवेश इत्यादावर्थस्य निवेशनक्रियानिरूपिताधिकरणत्वेप्यर्थमर्थं प्रतीति विग्रहो भाष्ये दर्शितः इति विषये तु प्रतिरेव वी
प्साया अपि योतकत्वमित्यन्यत्र। अन्यथा प्रतेर्निवेशन क्रियान्वयित्वेन सामर्थ्यादर्थशब्देन समासानापत्तिः निवेशन क्रियानिरूपिताधिकरणत्वादर्थ
पदात् सप्तम्यापत्तिश्च तस्मादकर्मकधातुलादियोगेऽर्थमर्थं प्रतिशब्दनिवेश इत्यादौ निवेशस्याधिकरणे सकर्मकयोगेपि कर्मत्वाविवक्षायां संबंधत्वेनविवक्षा
प्रश्नादि योत्यसंबंधेनान्वयविवक्षायां च द्वितीयार्थमिदं सूत्रमिति तत्त्वं। किंच वृक्षादीनां सेचनादि कर्मत्वे विषयत्वभावार्थे तत्संबंधबोधार्थं तादृश संबंध
योतकत्वमपि प्रश्नादीनां वाच्यं तथा व्याप्यत्व विशिष्ट वृक्षादि कर्मतानिरूपकत्वं व्यापकसेचनमिति कर्मत्वपक्षे बोधः तदविवक्षायांतु व्याप्यत्वविशिष्ट
वृक्षादि संबंधि व्यापकं सेचनमिति बोधस्तथात्वबोधे वैलक्षण्येन कथं तत्र तत्सिद्धिः इत्याकरोप्येवं। एतेन तथा प्रकाश दृश्याद्युक्तमपास्तमितिदिक्। न
देतत् ध्वनयन्नाह यत्रेति शेखरादाविसर्थः। मूले प्राचः प्रक्रियाकृतः तदुपपत्तिप्रकारान्तरमाह॥ मूले तंत्र। तस्मिन्नमुदाहरणे इत्यर्थः॥ अचार्यैरिति॥

यां प्राप्नुयादित्यर्थे इत्यर्थः। अर्थतो भाग इति॥ एतेनात्र चार्थतो मम भाग इति पर्यवसानादिति मूलयोजना ध्वनिता अत्र यन्मां प्राप्नुयात्तदीयतामि
ति शब्दार्थस्य पर्यवसानं भाग एव तत्तात्पर्यादिति भावः यच्छब्दस्य बुद्धिस्थत्वेन भागवाचित्वे तु दोषशंकैव नेति बोध्यं। ननु औचित्यात् सामर्थ्याच्च संभ
वात् कालाध्वनोर्गुणक्रियाद्रव्यैरभावेन चात्यन्तसंयोगे व्याप्तिरूपे द्वितीयेऽर्थे प्रत्यासत्त्या कालाध्व इति व्याप्तिविषयस्य लाभेऽपि अन्यसंबंधेऽन्यतः कुतो न
स्त आह। येनेति॥ अतिप्रत्यासत्तेरेवेति भावः॥ संयोग इति॥ गुणादीनामिति शेषः॥ मूले आहुरिति॥ प्रकाशकृत इति भावः। तस्मादिति॥ हेतोरुचि
य इत्यत्वादन्तरंगत्वादिति॥ एतेन कृत्वार्थे स्यादितत्वमिसंतं। मूलमनूद्य तन्मान्यार्थमोरब्धस्यापि द्विरब्धाभुक्ते इत्यत्र परत्वात्स्वरत्तो बाधकाभावादि
ति रत्नाकरोक्तं तस्य तत्र विशेषविहितत्वात् स्वरत्तो बाधकाभावादिति इत्युक्तं चापास्तं। परत्वादंतरंगत्वस्य प्राबल्यात् अत्ये। पक्षस्वरूपं चात्रांतरंगत्वं वि
शेषविहितत्वं चारितार्थ्ये सत्येव बाधकतात्प्रयोजकमित्यस्य प्राक् प्रतिपादितत्वाच्चेति दिक्॥ तामेवारुचिमाह तेनेति। अंतरंगत्वेनेत्यर्थः। ननु इत्वाख्यातिकृतो
र्थसत्त्वे तिशेषः भाष्यादिसंमतत्वात्। तन्मते सप्तसूत्र्यामेव तदनुवृत्तिस्फुटी भविष्यति चेदत्रैवेति। तथा च प्रकाशसौष्ठवे मूलादिचिंत्यमिति भावः। प
रास्तमिति। तथा चोक्तहेतोः प्रकाशसौगमत्वं मूलोक्तदोषारसाद्यनुसारेणेति। तद्भाष्ये दउप्याद्युक्तमयुक्तमिति बोध्यं। इति द्वितीया॥ मुख्यविशेष्यता
श्रयत्वरूपं प्राधान्यं प्रयोज्यव्यापाराद्वव्याप्[illegible] कर्मप्रत्यये फलेति प्रसक्तं चात आह॥ प्राधान्यं चेति॥ अत्र प्रकारतानाश्रयत्वमित्यत्वो
व क्तं प्रयोज्यव्यापारादौ व्याप्त्यादिरेव विशेष्यतानिरूपितप्रकारतानाश्रयत्वमित्युक्तेऽपि तथा धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वमित्युक्तेऽपि र्थे
तथा धात्वर्थत्वमित्युक्तं विशेष्यं। तथा च प्रत्यासत्त्या तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वे सति तद्धात्वर्थत्वं लभ्यं तथा च णिचि वाचकत्वादेवय ॥६०॥
यं तद्धातूत्तरप्रकृति धात्वभिन्नत्वेन तदुभयवाच्यव्यापारयोः स्वस्वार्थे प्रयुक्तरूपप्राधान्यात् प्रयोज्यव्यापाराश्रयस्य कर्तृत्वसिद्धिः द्योतकत्वेन तन्न सिध्येत्॥

पचतिभवति पश्य मृगो धावतीत्यादौ चैत्रमृगादेः कर्तृत्वसिद्धिः यद्वा तंडुलो देवदत्तेन पच्यत इत्यादौ फलस्य विशेष्यत्वेऽपि देवदत्तादेः कर्तृत्वसिद्ध्यै कर्तृप्रत्य
यान्तिविशेषणं वस्तुतस्तु कारके इति सूत्रभाष्यात्तु न धात्वर्थेऽपि कारकं चक्रं योऽत्र स्वातंत्र्यमिति लभ्यते प्रकृतसूत्रभाष्यात् स्वेच्छाधीनप्रवृत्तिनि
वृत्तिकत्वमपि स्वातंत्र्यमिति लभ्यते। तच्चारोपितमनारोपितं च संज्ञानिमित्तं। आद्यं स्थाल्यादावंस्य पुरुषो यस्य स्वातंत्र्यविवक्षा तद्व्यापार एव
धातुना प्राधान्येनोच्यते शाब्द शक्तिस्वभावात्। मूलोक्तं तु न युक्तं स्वतंत्रपदस्य तत्रापरिभाषणात् लोके उक्तार्थयोरेव तत्प्रसिद्धेश्च एतेन तथा प्रक्रा
शरत्नाकरदर्शितमप्युक्तमपास्तं। तथा कर्तृत्वं कर्तृसंज्ञाबाधितं कर्तृत्वशक्तिमत्त्वं सा च शक्तिर्व्यापारत्वावच्छिन्नकसंबंधेनोक्तरूपस्वत्वेन वर्तते। सूत्र
स्वरसात् स च तेन [illegible]ण कर्तृक्रियाभावसंबंधश्च तृतीयार्थस्तत्र प्रकृत्यर्थस्याभेदान्वयः। तस्य च धात्वर्थे आधेयतान्वयः तथा च चैत्रेण सुप्यते
इत्यादौ चैत्राभिन्नकर्तृवृत्तिः स्वाप इति बोध इति प्राचः द्वितीयाप्रकरणोक्तदिशा चैव कर्तृत्वं कर्तृ चैत्रीयोऽपि स्वाप इति बोध इत्युचितं स्पष्टं चेदं मं
जूषायामिति बोध्यमित्यन्यत्र विस्तरः यत्तु कृत्याश्रयत्वं ते क्रियानुकूलकृत्याश्रयत्वं वा तत्त्वमिति नैयायिकाः। अदृष्टद्वारा कार्यानुकूलज्ञानवत्त्व

त

वमित्योपनिषदाश्च तत्र कृत्यादेरपि धातुलभ्यत्वात् अचेतने व्याप्तेश्च लक्षणाविनैवोपपत्तेश्च विभक्तौ लक्षणा बोधिता च कर्मण्यपि यत्किंचित्कृ
त्याश्रयत्वेनातिव्याप्तेश्चेति दिक्। पाठक्रमान्वयवारणाय निरूपकत्वरूपव्यापकत्वसंबंधेन सचनाद्यन्वयः इत्यत्र प्रसादयत्नात्पर्ये प्राह का कर्मभव
चनीयत्वतया संबंधावच्छेदकत्वस्यायुक्तत्वात्। यद्यप्यत्र प्रतिविनापि द्विर्वचनरूपमानां तदंशे गृहीततात्पर्यविलक्षणादेव रक्षस्य तत्रत्वैव संबंधेऽना
न्वयः स्यात्तथापि तत्तेनाविवक्षायामनेन द्वितीया किं त्वेन तर्हि विवक्षेति चेत् संबंधत्वेनेति गृहाण अत एव संबंधार्थ इति प्रागुक्तमिति।। अत्रेदं बो
ध्यं यासामुपपदविभक्तीनां ननु तद्विशेषसंबंधे विधानं तत्र तेषां संबंधानां विशेषरूपेण विवक्षायां संबंधत्वेन विवक्षायां षष्ठ्येव स्पष्टं चेदं चतुर्थीत

इत्यति सूत्रे भाष्ये। तत्र हि तादर्थ्यस्य संबंधत्वेन विवक्षायां षष्ठ्युक्ता गुरोरिदं गुर्वर्थमिति विशेषसंबंधे विधानं च क्वचिद्दिशेषो लक्ष्य एव यथा सत्रानुर्लक्ष्य
ण इत्यादौ च क्वचित्तु तादर्थ्यस्य तत्संबंधेन संबंधिनि नियताकांक्षया यथाऽत एव तामित्यादौ वधित्वप्रतियोगित्वयोरिति। तथा च तादृविवक्षा
यामित्यर्थः ननु सामान्यविवक्षायामिति॥ अत एव वृक्षस्य वृक्षस्य प्रति सेचनमिति प्रागुक्तप्रयोगसिद्धिः तत्र भाष्यविरोधश्च। वैपरीत्यांगीकारे तु प्रया
गासिद्धावपि भाष्यविरोधो दुष्परिहार एव अपिना प्रत्यादियोगसंबंधेनान्वयविवक्षा समुच्चय इतीति दिक्। अभ्युपेत्याप्याह॥ किंच परेरिति॥ अन्वर्थत्वे
नेति॥ कर्मप्रवचनीयसंज्ञाया इत्यर्थः कर्मप्रवचनीयत्वस्य त्वस्योभयत्रान्वयः॥ अयं भावः महासंज्ञाकरणमन्वर्थत्वाय उपसर्गतायावस्थायां कर्मक्रिया
तत्तद्विशेषद्योतकत्वम्। कर्मप्रवचनीयाः [illegible]हुलका कर्तेरि भूतेऽनीयरा तेन यत्संप्रति तदुक्तविशेषं न द्योतयंति किंतु प्रयुज्यमानक्रियाकृतसंबंधवि
शेषं द्योतयंतीति तथेति तत्त्वं। तथा च तत्र क्रियागतविशेषं न द्योतयंति किंत्वाद प्रयुज्यमानक्रियाकृतसंबंधविशेषद्योतकत्वं तासानस्यातु वृक्षं प्रति
विद्योतत्व इत्यादौ तु अस्ति तथा रक्ष विद्योतनयोः प्राप्तिक्रियाजनितो यो लक्ष्यलक्षणभावाख्यः संबंधस्तत् द्योतकतास्य साधीनामितीति। नापत्ते
रिति। तथा च षष्ठ्यादिनिभावः किंच वृक्षं वृक्षं प्रति श्यामता वृक्षं वृक्षं प्रति फलानीत्यादौ प्राप्तिक्रियाजनितसंबंधविशेषद्योतकत्वस्यावश्यं वाच्यत्वा
त् न तत्र कर्मणि द्वितीयायाः प्रसक्तिरप्यस्ति। किंच यत्र कर्मणि द्वितीया स्यात्तत्र प्रतिना सामर्थ्याभावात् तत्र वृक्षमिति समासानापत्तेः। अत एव
भाष्ये किमर्थं पुनरिदमुच्यते न चोपसर्गादिसंज्ञाबाधनार्थं क्रियायोगाभावादित्युक्ता द्वितीयार्थमिति सिद्धांतितं। अत एव चोपयाह। धातुनोक्तेति।
तथा च तत्र कर्मत्वादिव्यावृत्तये निरूपदं क्रियापदेनात्र प्रधानव्यापारः अनंतरयोगे शेषषष्ठी प्राप्ते राह तं नेरति। तथा च तदपवादबाधादुपपदविभक्तित्वे
न षष्ठ्यर्थ एवेति भावः। अत्र क्रियाशब्दः फलपरः। पंचम्यत्रेत्यस्याधिक्यादाह। येषामिति। अधिकरणादीनामित्यर्थः। [illegible]

हर्युक्तिरियं। एवमग्रेपि। तत्करणत्वादिस्य वस्तु अनिर्दिष्टं यं अश्वत्वादिकं सर्वप्रति यथानियतं तद्वदिदं न नियतं किंतु वैवक्षिकमिति। रत्नाकरो न व्याख्याने वस्तु
तत्त्वसादृश्ययथ्यापत्तिरूपमानोपमेयत्वेन व्याख्यानबीजाभावश्च। अतआह। वस्तुनीत्यादि वस्तुनि घटादौ एवमग्रेपि सूत्रेस्तसौ ग्राह्यराह। सार्वेति। आ
याद्राकृतिगणत्वादितिभावः। ननु संख्यत्वया तन्निर्देशो नेव संभवति अयं कर्तृत्वस्यैव प्रकारत्वयात्तु सर्वत्र संभवतीत्यत आह इदं वक्ष्यति॥ तथाच सर्ववाक्य
मिति न्यायेन वस्तुनि तदेवेति न निर्दिष्टरूपमिति मूलार्थो बोध्यः ननु घटादेः घटादिभिन्नत्वाद्वस्तु व्यवस्थितत्वमेवात आह। तत्तद्रूपेणेति॥ कर्तृत्वादिरूपेण
मर्थः। तथाच तदिदस्यानुषंगेणे योग्यविभक्तिकल्पनया न्वयइतिभावः॥ ननु नीलोत्पलादौ विशेषणत्वादेर्नियतत्वमेवात आह। विशेषणेति॥ मूले प्रसंगतुल्य
त्ववतिरितिभावः। आदिना वाचकपाठकादिपरिग्रहः। अधिकरणत्वेति। निश्चिताधिकरणता विस्थाली॥ ननु नरकपालत्वाच्छीघ्रतरं पाकसाधनत्वेनानुभवति
वैवक्षिकं करणत्वमितिभावः। नन्वेवमपि कारकत्वव्यभिचारोनदृष्टः तआह। तंदुलानिति। कारकस्यापीत्यस्य तंदुलस्येतिशेषः क्वचित्तथापाठएव एकत्रो
क्तत्वेप्यादिपदस्य सर्वत्रसंबधो बोध्यः। ओदनेति॥ ननु क्रियेतिभावः। अतएव कारकत्वं प्रतिपादितमिदं प्राक् प्रकर्षश्च कर्तृसंबंधी नस्यापि न करणं
तदपेक्षः किंतु कारकांतरापेक्षएव कारकसामान्यवाचिसाधकशब्दादुत्पद्यमानेन तमपा ततएव प्रकर्षबोधनात् अतएवाश्वेन यथा दीपिकया
व्रजतीति भवतीति बोध्यं। करणतृतीयाया आश्रयो व्यापारश्चार्थ इति भूषणकृत् व्यापारमात्रमर्थइति मनोरमाविलासकृत् प्रकृत्यर्थस्य व्यापारे
आधेयत्वसंबंधेनान्वयः व्यापारस्य तु जन्यत्वेनेति तद्भावः आश्रयमात्रमर्थः तत्रप्रकृतिप्रत्ययार्थयोर्विशेष्यविशेषणभावस्तस्य च स्वनिष्ठव्यापार
जन्यत्वसंबंधेन धात्वर्थेन्वयइति मंजूषाकृतो मान्यमान्याः। वस्तुतस्तु करणत्वं करणताशक्तिमत्वं साचशक्तिर्यद्व्यापाराव्यवधानेन फलनिष्पत्तिर्विव
क्षा तन्निष्ठा सच तेनरूपेणाक्रिया करणभावः संबंधश्च तृतीयार्थः करणवाणीयो वाणकरणकोवा न धरतितत्वं कारकत्वं व्यक्तिपरिहाराय। प्रकृतधा

हितिः ॥ ननु अनेक धेयनंतरमनेक व्यापार प्रदर्शनोत्तरमेवं चेति ग्रंथः संगते। नन्वन्यायेत्यत आशानेक धातमेवेति ॥ तथाचैवं चैतस्य मूलस्यातएवेय
र्थः कर्तृत्वादीनां वैवक्षिकत्वे चेत्यर्थो वा बाध्यइति अनेनसूचितं। स्थाल्यां तंडुल धारणान्य व्यापाराभावेनादि पदानर्थक्यं परिहरति आदिनेति। तंडुले
ष्वपि विभागान्य व्यापाराभावेनादि पदानर्थक्या[illegible] दाहादिनेति ॥ तथाच तंडुलपदं मूलस्थमुपलक्षणमितिभावः तंडुलानां कर्तृत्वस्य तत्रैव संभ
वात् कर्मेति ॥ नन्वेवंरीत्या संप्रदानापादानयोरपि कर्तृत्वं स्यात् संप्रदानेति ॥ अपादान ग्रहणं तस्यार्थे शब्दचासंभवाद्दाहात्तु इति ॥ ननु किंनाम स्वप्रकाश
त्वं किं स्वश्चासौ प्रकाशश्च स्वप्रकाशस्तत्वं सजातीय प्रकाशा प्रकाश्यत्वं वा स्वसत्तायां प्रकाशाव्यतिरेक विरहित्वं वा स्वव्यापार हेतु प्रकाशत्वं वा ज्ञान
विषयत्वं वा ज्ञानाविषयत्वे सत्यपरोक्षत्वं वा। अवेद्यत्वे सत्यपरोक्ष व्यवहारविषयत्वं वा तद्योग्यत्वं वा ॥ नाद्यः। वेद्यस्यापिज्ञानस्य स्वप्रकाशत्वाभ्युपगमा
त् नद्वितीयः प्रदीपादेः सजातीय प्रकाशाप्रकाश्यस्य स्वयंप्रकाशत्वेन लक्षणस्यातिव्याप्तेः घटादेरपि सजातीय प्रकाशाप्रकाश्याभवेयुः ननुसत्ता
या सजातीयत्वं तत्राप्यस्तीति चेन्न विशेषणवैयर्थ्यापत्तेः। सत्ताविरहिणः प्रकाशस्यैव भावात् प्रकाशाप्रकाश्य मित्येतावतैव चारितार्थ्यात् नतृती
यः सुखादावतिव्याप्तेः। सुखादेरपि स्वसत्तायां प्रकाशाव्यभिचारात्। नतुरीयः प्रदीपादावतिव्याप्तेः प्रदीपादेरपि स्वव्यवहार हेतुत्वात् प्रकाशत्वाच्च
अथज्ञान व्यवहार हेतु प्रकाशत्वं विवक्षितं तदपिन अनुव्यवसायेतिव्याप्तेः तस्यैवं पक्षेपि व्यवसायज्ञान व्यवहार हेतु प्रकाशत्वात्। प्रदीपज्ञानमिदमिति
व्यवहार हेतौ प्रदीप प्रकाशेतिव्याप्तेश्च किंच व्यवहारहेतुत्वं विशेषणमुपलक्षणं वा नाद्यः मुक्ति प्रलयादावव्याप्तेः। नद्वितीयः उपलक्षणत्वस्यापि विशे
षणत्वे प्रागुक्तदोषापत्तेः स्वरूपमात्रत्वे तु ज्ञानं प्रकाशत्वे वापत्तेः तथाच लक्षणासिद्धिः नापि पंचमः स्वयंप्रकाशत्व साधकानुमानागमादिज्ञानविषय ॥६२॥
त्वेन लक्षणस्यासंभवित्वात्। तस्याप्यविषयत्वे कथा प्रवृत्त्यनुपपत्तेः नापि षष्ठः अविषयत्वस्यैवासंभवेन निरस्तत्वात्। विषयत्व ग्रहणेन कर्मविवक्षायांतु

125

रूमतानुसारिणा मात्मन्यति व्याप्तेश्च तस्य ग्राहकत्वः प्रसिद्धस्याविषत्वेप्यपरोक्षतयातैरनंगीकारात् नापि सप्तमः प्रागुक्तदोषापत्तेः शुक्तिरजतादिसं
सर्गे असत् व्याप्तिवादिना मतिव्याप्तेश्च तस्य व्यवहार विषयत्वेपि तैर्ज्ञानविषयत्वानंगीकारात् नाप्यष्टमः स्वप्रतिबद्धव्यवहारे स[illegible]जातीयपरानपेक्षत्वस्य
प्रदीपादौ घटादौ च भावात् अतिव्याप्तेः सत्तया सजातीयत्व विवक्षायां तु व्यवहारस्य सत्तया सजातीयादृष्टेः अन्यस्य तदपेक्षत्वेन लक्षणस्यासंभवित्वप्र
संगात् । नापि नवमः अवेद्यत्वेऽनुमानाद्यगोचरत्वया कथानवतारप्रसंगस्य दर्शितत्वात् । अपरोक्षव्यवहार विषयत्वमिति शब्देन प्रत्यक्षज्ञानविषयत्वस्य
कंठत उक्तत्वात् तद्विपरीतावेद्यताभिधाने ममातावंध्येति वद्व्याघाताच्च सुषुप्तिप्रलयमोक्षेषु व्याप्तेश्च ॥ तदा व्यवहारस्यैवाभावेन तद्विषयत्वाभावात् ना
पि दशमः उक्तव्यवहार योग्यताया धर्मत्वे द्वैतवादिनामपसिद्धांतात् सिद्धांतायातात् । स्वरूपत्वे च ज्ञानस्वभावस्यात्मनो व्यवहारनिरूपणीयत्वात् संमति योगि
त्वप्रसंगात् । अथावेद्यत्वे सत्यपरोक्षव्यवहार योग्यत्वमेवोत्तर मीमांसोक्तं तत्तं न च योग्यतारूप धर्मांगीकारे व्याप्तिमोक्षदशायां तदपसिद्धतापत्तिरिति वाच्य
योग्यतासंताभावानधिकरणत्वस्य तत्त्वात् । गुणत्वात्यंताभावानधिकरणत्वस्य द्रव्यत्ववत् तेन नाव्याप्तिः नाप्यपसिद्धांतः काल्पनिक धर्माणां संसारदशा
यामभ्युपगमात् अक्षमाभवतः कैयं साधकत्व प्रकल्पने किं न पश्यसि संसारे तत्रैवाज्ञानकल्पितत्वमिति सुरेश्वराचार्योक्तेः आनंदो विषयानुभवो नित्यत्वं च
सन्ति धर्मा इति पंचपादिकाचार्योक्तेश्च मोक्षदशायां विवक्षितधर्माभावेपि कदाचित्सत्त्वेन तदत्यंताभावानधिकरणत्वस्य गुणाश्रयो द्रव्यमितिवत् सिद्धेः अपरो
क्षव्यवहार योग्यघटादावतिव्याप्तिपरिहारार्थमवेद्यत्वे सतीति विशेषणं न चैतावदेवास्तु तल्लक्षणमिति वाच्यं तथा सति अतीतानागतयोर्धर्मसानुमेयेषु
धर्मादिष्वतिव्याप्तेः न च तेषामप्यागमवेद्यत्वान्नावेद्यत्वमिति वाच्यं ॥ फलव्याप्यत्वलक्षणवेद्यत्वस्य तत्राभावात् तत्र विशिष्टशाब्द प्रमाणवृत्त्या तदाकारधी
वृत्तिसमुल्लासमात्रादेव तद्व्यवहार इति वेदांतिनां प्रक्रिया । न च योगि प्रत्यक्षतया अपरोक्षत्वं धर्मादीनां चेदमेवैक प्रमाणवेद्यत्वात् । न चैतावता ते

षां सर्वदर्शित्वाभावः योगिनां सर्वदर्शित्वशब्देन योग्यसर्वदृष्टृत्वस्य विवक्षितत्वात्। यत्राप्यतिशयो दृष्टः स स्वार्थानतिलंघनात् दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्र

ति वृत्तितेत्यायात्। अतो धर्मादिव्यवच्छेदार्थमपरोक्षव्यवहारयोग्यत्वे सतीति विशेषणं। न च तानांतःकरणतद्धर्मेच्छादिषु शुक्तिरजतादिषु लक्षणस्यातिव्याप्ति

स्तदवस्था तेषामपि फलव्याप्यत्वाभावेनावेद्यत्वात्। अहमत्र इच्छा इत्यपरोक्षव्यवहारयोग्यत्वाच्चेति वाच्यं तेषामेव घटत्वस्यापरोक्षव्यवहारयोग्यत्वाभावात्। अध्य

स्तत्वेनैव तेषां सिद्धेः न च तथाप्यपरोक्षमिति व्यवहारयोग्यत्वाभावात्। अध्यस्तत्वेनैव तेषां सिद्धेः न च तथाप्यपरोक्षमिति व्यवहारदर्शनात् न योग्यता तत्र कल्पनी

ति वाच्यं। रजतादिव्यवहारायोग्येऽपि शुक्तिरजतकल्पादौ रजतव्यवहारदर्शनात्॥ न चैवमवेद्यत्वविशेषणं व्यर्थं व्यवच्छेद्याभावात्। घटादेरप्यध्यस्तत्वम

परोक्षव्यवहारयोग्यत्वाभावात् इति वाच्यं व्यवहारदशायां तेषां प्रत्यक्षप्रमाणविषयाणामपरोक्षव्यवहारयोग्यत्वांगीकारात्। तथाप्यवेद्यत्वे सत्यपरोक्षत्वमे

व लक्षणमस्तु व्यभिचारादिति चेत्सत्यं अपरोक्षज्ञानविषयत्वेनैव घटादिष्वपरोक्षत्वांगीकारात्। अत्रापि तथात्वाभ्युपगम इति विभ्रमो माभूदिति तद्व्यवहार

णैव प्रतिवादिनामपि संप्रतिपन्नेन तदेव स्फुटीक्रियत इति न कश्चिद्दोषः। स्वयं तत्त्ववेद्यस्य व्यवहारयोग्यत्वमिति चेत् किमवेद्यत्वे व्यवहारविषयत्वं न स्यादिति

निष्ठापादनमुत व्यवहारविषयत्वाद्वेद्यत्वानुमानं नाद्यः आपाद्यापादकयोरुभयोरपि परेषामसिद्धेः नेतरः तस्य संप्रति साधननिरासः समये निराकरिष्यमा

णत्वादिति वेदांतिमतमेवास्तीति चेत्तर्हि स्वविषयज्ञानांगीकारात् कर्तृत्वकर्मत्वसंभवेन विरोधोपपत्त्या शब्दविशेषो येत्यादिदोषानवकाशोऽत आह। ज्ञानविषयत्वे इति

ज्ञानस्वरूपस्यात्मनः स्वरूपज्ञानविषयत्वे इत्यर्थः स्वस्य स्वयमेव प्रकाश इति तदर्थ इति भावः इदं च विज्ञानमेवात्मेति वादिनां मते प्रभाकरमतेऽप्ययं दोषः कर्तृक

र्मविरोधस्त्वेति॥ कर्तृत्वं कर्मत्वं च विरुद्धमित्यर्थः ननु तयोर्मिथो विरोधस्त्वसत्यर्थः तदाह। भेदइति॥ तत्र कर्तृत्वाभावे युक्तिमाह। धारेति। कर्मत्वाभावे तामाह। वि

षयेति॥ नानेन विरोधः खंड्यते किंतु कर्मशब्दप्रयोगखंडनं तदाह। शब्दविशेषोपेति। तत्र शब्दविशेषस्योपाधिलक्षणानाक्रांतत्वादाह। शब्दविशेषनिमित्ते

ति। फलात्वर्थे क्रियायां यस्य स्वातंत्र्य विवक्षा तदा तत्र सकर्ता यदुपात्तया कर्तृक्रियामादाय आप्तुमिष्टतमत्वेन यद्विवक्षा तदा तत्कारकं तत् क्रियायां क
र्मेत्येवं शब्दविशेषनिमित्तकस्येत्यर्थः प्रकारांतराभिप्रायक शब्दप्रयोगेण तत्तदुक्तिसंभवेन मूलासंगत्यं परिहरति। कर्तृकर्मेति॥ यथासंख्यमन्वयः
नन्वेवमपि स्वप्रकाश शब्दस्यासाधुतापत्तिरत आह। स्वप्नेति। स्वप्रकाशयतीति स्वप्रकाश इति व्युत्पत्तेरिति भावः एवं च मूलोक्तदोषो वारितस्तथा च सम्यग ति
वगतत्वदिति। गूढाकूतं॥ ननु यत्किंचिदपेक्षया परत्वस्यानियतत्वादनिष्टमप्यत आह। कर्मत्वेति। तस्यैव लक्ष्यत्वे नापरस्थितत्वात् तदन्यत्वस्यैवोचितत्वादिति
भावः कर्मत्वस्यैतत्साध्यत्वेनेतः प्रागसत्वादाह अभिमतेति॥ किमर्थमस्य निवेश इत आह। गम्यादीति॥ गच्छति ग्रामं चैत्र इत्यत्र चैत्र इत्यर्थः संयोगस्य तत्रापि सत्वा
त् संयोगस्य तत्र सत्वेपि स्वसमवेत क्रियाजन्य धात्वर्थफलाश्रयत्वं कर्मत्वं परसमवेतेति विशेषणाच्चैत्रश्चैत्रं गच्छतीति न प्रयोगः तत्र [illegible] द्वितीयया
स्वप्रकृत्यर्थापेक्षया परत्वं बोध्यते आख्यातेन तु स्वार्थसंख्यान्वय्यपेक्षया परसमवेतत्वं च धात्वर्थक्रियान्वयि तथैव कार्यकारणभावान्तरकल्पनात् भा
विप्रायः पूर्वदेशत्यजेरुत्तरदेशस्पंदेश्च पूर्वपरयोः कर्मत्व वारणाय धात्वर्थेति॥ तत्र क्रियायाः फलस्य च धातुनैव लाभादाधेयत्वं भेदश्च द्वितीयार्थः त
त्र फले आधान्वयोत्स्य सामानाधिकरण्येन व्यापारे भेदप्रकृत्यर्थस्य फलान्वयि व्यक्तिविशेषावच्छिन्न प्रतियोगितयान्वयः एवं च ग्रामं गच्छतीत्यादौ ग्रामा
धेयफलानुकूल ग्रामभेदसमानाधिकरण व्यापारानुकूल कृतिमानिति बोधः एतेन प्रतियोगिता सामान्येनान्वये द्विवावच्छिन्न प्रतियोगितयान्वये तु
देवदत्तो द्रव्यं गच्छतीत्यस्यात्रापत्तिरिति निरस्तमिति तदभिप्रायमाह। संयोगस्यैवेति तथात्वं धात्वर्थतावच्छेदकत्वं प्रयागात् काशीं गच्छतीत्यादौ संयोगावच्छि
न्नव्यापार एव शक्तिकल्पनात्। ननु विभागेति। प्रयागादिनिष्ठविभागस्य तद्धात्ववाच्यत्वेन तदनवच्छेदकत्वमिति भावः ननु धात्वर्थतावच्छेदके सत्र धातु
ति पदेन प्राणे पठित धातूनामेव ग्रहणमुत तदन्येषामपि तत्र नाद्य इत्याह। मूले ग्राममिति॥ तदुपपत्तिः। तन्मत इति। नैयायिकमत इत्यर्थः। गमनस्या संया

स्ये

गानुकूलव्यापारस्याप्रकृत्यर्थत्वेपि प्रकृतिधात्वर्थत्वेपि तत्तानवच्छेदकत्वात्। धात्वर्थतात्मनवच्छेदकत्वात् नद्वितीयइत्याह। तत्रैवेति। तद्व्याचष्टे
ष्यंतेति॥ संयोगानुकूलव्यापारावधित्वव्यापारण्यंतशालि स्वीकारादितिभावः। ननुयत्क्रियाजन्यधात्वर्थतावच्छेदकफलशालियत्तत्क्रियाकर्मेतितत
क्रियाभेदेननानालक्षणाकरणाच्चातिव्याप्तिः पच्याद्विप्रकृतिकणिजंतस्थले प्रकृत्यर्थस्यावच्छेदकत्वानंगीकारात्। सर्वत्रप्रतीतेरेवानुसर्तव्यत्वात् तथाच
तत्रणिचएवशालित्वत्रव्यापा नतुण्यंतस्याविशिष्ट इतिचेन्न नानालक्षणकरणेतिगौरवात्। क्वावच्छेदकं क्वेतिनियंतुमशक्यत्वात्चेतिभावः विधिबलादि
त्यर्थ वारणायाहागस्यापीति॥ मूलेअपादानेपितद्वीति॥ एवंचतद्भावत्वच धात्वर्थतावच्छेदकत्वविवक्षापरिश्रमोनिष्फलः किंचपरयाकर्तृ संज्ञयाबाधन
तत्प्रयोगाप्पत्तेरसंभवेन भेदशालित्वकल्पनस्यव्यर्थत्वात् अधिकंमञ्जूषायांद्रष्टव्यं। ननुस्वमते सूत्रेणेष्टसिद्धिरिति परमतमेवाश्रयकमित्याशयेनशंकते
नन्विसादि। तत्वेन। धात्वर्थनविभागजन्यसंयोगानुकूलोव्यापारोधात्वर्थः। उद्देश्यत्वसत्वे आह। कर्तुरिति। तदभावेआह। तथायुक्तमितिवेति। हत्वसिद्धिं
परिहरति॥ अपादानेति। [illegible] तत्रैवस्फुटीभविष्यति। तथायुक्तमिति सूत्राशयेनेदमुत्तरमित्याह। विषमिति॥ आदिनोदासीनसंग्रहः ननुआय
सूत्राभिप्रायमिदं कुतोनेत्यतआह। कर्तुरि[illegible]तीति॥ अपादानमुत्तराणि कारणि वा धंत्ते इत्युक्तः प्रतिपादितमिदं प्राक्॥ सकर्मकाकर्मकस्थले सर्वत्रापाद
नत्वविषयेतथायुक्तमित्यस्य प्राप्तिर्विभागस्यधात्वर्थत्वादितितन्निरवकाशमिति तेन तद्बाधः एवंसति अकर्मकयोगे पादानत्वस्य चारितार्थ्यात् विभा
गादन्यत्र कर्मत्वस्य चारितार्थ्यात् सत्वात्कर्तुरिप्सितेन तस्य बाध इतिभावः अस्यावकाशमुक्तमाहइत एवेति। तस्य तद्बाधकत्वादित्यर्थः द्वितीयेति। उद्देश्य
त्वसत्वेन कर्तुरिप्सितस्य प्राप्तिरितिभावः॥ ॥तथायुक्तमित्यस्यापि फलस्य धातुवाच्यत्वे एव प्रवृत्तिरितिमतेतु शास्त्रप्रवृत्तिरेव न एतेन पुरस्ताद ॥६९॥
पवादन्यायेन कर्तुरीप्सितमित्यस्यैव बाधः स्यादित्यपास्तं। ततआगतइति सूत्रासांगत्यापत्तेश्च। नन्वेवं प्रयागस्यापि तेनैव कर्मत्वापत्तिस्तद्वत्तत्राप्यु
तत्र

दुःखत्वांगीकारो दत्त आहापादानेति ॥ वस्तुतस्तस्य नत्वेपि तथात्वं तु मिश्रस्याप्राप्तिरेव साहाय्यादानेति । कालिक संबंधेन फलाश्रये तिव्याप्तिवारणाय कर्मल
क्षणे उभयत्र फलतावच्छेदक संबंधेन फलाश्रयत्वस्य विवक्षितत्वात् कर्तृनिष्ठविभागीयानुयोगितासंबंधस्यैव तत्रत्वात् । अतएव वृक्षाद्विभजत इत्यादौ पं
चमी अत्र विश्लेषस्यैव धात्वर्थत्वं सार्वत्रिकमिति भावः । द्वयोः संज्ञयोर्बाध्यबाधक भाव उक्तस्तद्विषयत्वस्याय सत्वादोहक संज्ञेति । सत्यो स्ताइत्याः शरीरमि
ति । नचैवं चैत्रः श्वैत्रं गच्छतीत्यत्रापि शरीरप्रदेशांतरावच्छिन्नात्मभेदस्यापि कल्पनायां साधुत्वं स्यादिति वाच्यं । तत्र प्रयोगे तथात्वे इष्टापत्तेरितिदिक् । यथा
श्रुतमसुलं मूलं सिद्धांतरीत्या योजयति । विभक्त्यर्थस्येति ॥ क्रियाकारकभावस्येत्यर्थः संसर्गत्वमतो संसर्गत्वमिति मते कर्मत्वादि शक्तिमत्कारकं तु नत
द्वाच्योर्थः किंतु प्रातिपदिकार्थः पंचरूपकस्यैव सिद्धांतित्वादत आह । तदंतो वेति । विभक्त्यर्थत्वादिति भावः तथाच तदुपस्थितानां तदुपस्थि
तसंबंधेन क्रियां प्रतिविशेषणत्वमिति मूलार्थो बोध्यो भाष्यरीत्या । मूले कर्मत्वादिति ॥ प्रकृताभिप्रायमेतत् । करणाधिकरणयोः कृतिकर्मख्याते
च व्यत्यासदर्शनात् । उपस्थिति शाब्दबोधयोः साम्यायाह ॥ तद्व्यत्यासे नैवेति । विशेष्यविशेषणभावव्यत्यासेनैवेत्यर्थः एवं च वैषम्यनिवृत्तिः । तदुपेति
फलव्यापारयोरित्यर्थः तदेव स्पष्टयति ॥ तत्रैवेति । कर्मादिप्रत्ययसमभिव्याहार इत्यर्थः एवं च वैपरीत्यनिवृत्तिः मूले विषयीति ॥ विश्लेषाश्चात्र धा
च तुवाच्याः प्राणवियोग एवा तदुद्देश्येनैव रामव्यापार प्रवृत्तेः करणस्यैव फलेप्यन्वयः तस्य करणव्यापारजन्यत्वात् एवं च मूलोक्तसाध्यत्वं तयोः कृ
र्मधारयोत्तरं वियोगांतेन कर्मधारयो वैपरीत्यं वेति बोध्यं ॥ एवं सति रामस्य यथा कर्तृत्वं तथा प्राग्निरूपितं एतेन तथा प्रकाश रत्नाकर इत्या
द्युक्तं कर्माख्यातेन व्यासः [illegible] कर्त्राख्यातवत् बोधः । कर्मकृतितुल्य इतिद्रष्टव्यं चापास्ते ननु मूले इष्टापत्तौ । कर्तृकरणकृतोरिति हेतुः
स चायुक्तः । अत्र बहुलग्रहणेन वाक्यत्वेन च तत्सूत्रविषयताभावादत आह । कृत्सकृत्सर्थेति ॥ तदन्वययोग्यतावच्छेदकासत्त्वरूपस्य [illegible] तत्रापि

सत्वादिति भावः। नन्वेवमुत्तरग्रंथासंगतिरत आह ॥ नत्रैवेति ॥ तत्रापि तदन्वय एवेत्यर्थः प्राचामुक्तिं खंडयति। यत्विति ॥ आख्यात वा
च्यक्रियायामेव तदन्वय इति तदभिप्रायः ॥ भवतीति ॥ भवतिपदवाच्यक्रियायामित्यर्थः। एवमग्रेपि ॥ अस्तिर्भवंतीपरः सर्वत्राप्रयुज्यमानो प्यस्तीति
भाष्योक्तेरिति भावः। विभक्त्यावि सस्यस्यसम्मानतइति शेषः ॥ पार्ष्ठिकान्वयात् आकांक्षान्वयांगीकारात्। तेषां कर्तृकरणे इत्यादीनां। ननु प्राथमिकान्वयस्त
त्र किं कर्तृत्वेनोत करणत्वेन तत्र नाद्य इत्याह ॥ भवतीति ॥ नांत्य इत्याह। करणत्वेनेति ॥ पार्ष्ठिकस्येति ॥ बोधस्य तत्वात् द्विषयस्यापि तत्समत एव तेन सामानाधि
करण्यमिति भावः इष्टापत्तावुभयसाधारणं दोषमाह। कर्त्रेति। कर्तृकरणे इत्यत्र कर्त्रेत्यंशस्येत्यर्थः। वियद्वाक्यस्येति। लौकिकवाक्येत्यर्थः। भित्रेति। समासेइ
ति ॥ आदिः इदंचाग्रे स्फुटी भविष्यति। आकृतीति ॥ तथाच वार्तिके आदिशब्दः प्रकारे। मूलस्यादिना ग्रहणेनाभावः पदत्वेन विषयत्वादि संग्रह इति बो
ध्यं ॥ इदंचेति ॥ वार्तिकेचेत्यर्थः भाष्येत्तथैव स्पष्टत्वादिति भावः इदंचोदाहरणे एव स्फुटं। नामसंबंधीति ॥ नामसंज्ञाप्येत्यर्थः ॥ एवंचरीतिनदांत इत्योदावपि
बोध्यं। ननु तदनुवृत्तावुभयविधिसामर्थ्यान समावेशः सिद्ध एवेति किं चेनात आहे केति ॥ एतेन तथारतास्य इत्यादिग्रंथाश्रिंसा इति बाधित। ननु अक्ष
णादेवेते साधो कृ. सत्सयोगे षष्ठ्यापवादत्वात द्वितीया बाध्यते तृतीयातु परत्वादिति कैयट विरोधान्मनसादेव इति प्रयोगाश्रिंस इत्याश्रयेन हरदत्तानुया
यि प्रकाशानुवादं खंडयति ॥ नन्वित्यादि प्राशेरिति। तृतीयद्वितीययोः परत्वापवादत्वाभ्यां नयाबाधादिति भावः। ननु कैयट एवासंगत इत्याशंकते। नन्वेति
कर्तृकर्मणोरित्यत्र प्रधानधात्वर्थव्यापाराश्रयस्य कर्तृपदेन ग्रहणात साहचर्यात्मुख्यव्यवहारेण नतु व्यपदेशिवद्भावेन धात्वर्थफलाश्रयस्यैव कर्मपदेन
ग्रहणमिति ~~अक्षेत्र~~ समुदितार्थः साहचर्याश्रयणमनित्यत्वेप्यत्रावश्य कर्मि साहातएवेति। तस्यैवग्रहणेन स्तोकपदार्थ व्यपदेशिवद्भावेन तदवत्सामानाधि
करण्यादेवेत्यर्थः द्वितीयातु नतो नीलं घट मित्यादिवत्कृते सामानाधिकरण्यादिति प्राक् प्रतिपादितं। ननु कर्तृसाहचर्येण धात्वर्थकर्मण एव तत्र ग्रहणमिति।

तत्कैयटाशय इत्याशयेन समाधत्ते। धात्वर्थे फल इत्यर्थः। भेदेनेति॥ क्रियाकारकभावरूपसंबंधेनेत्यर्थः। तदुपपत्ताविति। स्तोकं पाक इत्यत्र षष्ठ्यभावोपपत्तावित्य
र्थः। तत्र स्तोकपदार्थस्य फले ऽभेदेनान्वय इति भावः। त्वाप्रवृत्ताविति मनसादेव इत्यत्र कर्तृकर्मणोरिति षष्ठ्या अप्रवृत्तावित्यर्थः। एतेन स्तोकस्य पाक इत्यपि भवतीति
नैयायिकोक्तमपास्तं। अत्रमानमाह। ध्वनितमिति॥ उक्तं कैयटः तथा च दृशा कर्मग्रहणमेव तदभिमतेन तु शांकृकोक्तमन्यथा तदसंगतिः स्पष्टेवेति भावः
नन्वनार्षत्वाविशेषे हरदत्तोक्तमनुरोधाय तादृशकर्मैव तत्र गृह्यतामिति धात्वर्थफलानाश्रयत्वान्मनसा देव इत्यत्र न षष्ठीप्राप्तिरत आह॥ तादृशेति॥ मनसा
देव इत्यत्र लुप्तविभक्तिकमित्यर्थः संसेत्यनेन प्रयोगसत्ता ध्वनिता साचहेतुतृतीयान्तमनःशब्देनाय च्घञंतदेवशब्दस्य समासेन वाक्येन वा बोध्या। ननु कैयटपु
नूरीत्या द्वितीयमपि फलं तेनाशयेनाशंकते। नचेति। वैकल्पिकेत्यस्य चं विनात्। रीत्या कर्मकरणसंज्ञयोरित्यादिः अपिः समावेशसमुच्चायकः येषांदेशकाला
दिभिन्नं कर्म न संभवति त एवात्र शास्त्रे ऽकर्मका इति हि तैरुक्तं। वस्तुतो युक्तमेतत्। अविवक्षितकर्मणामपि तेन ग्रहणात्। कादीनामविवक्षितकर्मभ्यः रु
तपूर्वीकरणमित्यादौ भाष्यकृता कैयटेन चांगीकारात् लुनाति निर्वृत्तप्रेषणास्यचित्रावप्रति केदारं देवदत्त इत्यादौ केदारस्य कर्म द्वितीयां तस्य णरणौ विषयत्र
कैयटेन प्रयुक्तत्वाच्च। न चात्रार्थान्तरे वृत्त्या ऽकर्मकत्वं न त्वविवक्षयेति वाच्यं तत्प्रसभितया ऽर्थान्तराभावात्। तदुदाहरणं तु स्यंदते रसा पर्यंतं नदीवह
तीयायाकरे स्पष्टं अतएव कर्तुरीति सिद्धिरित्यपास्तं नियमेन व्यावृत्तेः। अधीगर्थेति सूत्रे कर्मणः शेषत्वविवक्षया कर्मकत्वे मातुः स्मर्यते इत्यत्र भावत्वस्य
भाष्ये उदाहृतत्वाच्च। अधिकं शेखरादौ द्रष्टव्यमित्याशयेन समाधत्ते। तत्रेति। अकर्मकपदघटितसूत्रे इत्यर्थः। एवाविवक्षितकर्मव्यावृत्तौ न्यत्र उद्योतशेख
रादौ। तदविवक्षा च द्विधा तदन्वययोग्यधात्वर्थयोगात् सत्वेच तस्मिन्नर्थे संबंधित्वादिना ऽन्वयविवक्षणाद्वा। प्रकृते च नोभयमिति तद्भावसिद्धिरिति भा
वः। एतेन ननु संज्ञया वैकल्पिकत्वेपि पक्षे कर्मयोगस्य सत्वेनास्यं तावि घमा न कर्मकत्वाभावे नकर्मकत्वं न भविष्यत्येव। न चास्मिन्प्रयोगे तत्वमस्त्येव। अ

विवक्षित कर्मणि यत्वादावपि दोषापत्तेः नचतस्मिन्नेवार्थे कर्मयोगो स्तीत्यतो नदोषइतिवाच्यं। प्रकृतेप्यदोषादित्यरूचेराह। णावितीति मान्योक्तं प्राचा
मनुरोधेनेति ध्वनितं अतएवाह। फलांतरमिति। फलांतरमाह। दीव्यतेरिति। ननु स्थलत्रयकर्मसंज्ञा फलोक्तावपि करणसंज्ञाफलं नोक्तमिति न्यूनता
तआह। करणत्वाच्चेति। चस्त्वर्थे यथेयोज्यः मूले प्राचा प्रक्रिया कृता यद्दितु वाशब्दो वचार्थे यद्वासंज्ञाया नानाफलकत्वेपि प्रकृतविभक्तिरूपकार्येयो
रेकप्रकृतेः समुच्चयासंभवाद्वश्य कल्प्यो विकल्पइत्याशयकः सयंथइति प्रकाशोक्तं स्वीक्रियते तदा प्राचोक्तं सम्यगेव अतएव लक्ष्येवाशब्दः परमभूले
उक्तः। एवंच मूलं प्रकाशोक्त प्रथम कल्पाभिप्रायमिति तथाद्इत्याद्युक्तं चिंत्यमिति बोध्यं। मूले ननु द्वितीयेति। एवंचाक्षैरक्षान्वेति परममूले मयुक्तं किंतभ
यथाप्यक्षैरित्येव वक्तुमुचितमितिभावः युक्तंचेतत्॥ साधकतमगतकर्मत्वशक्तिबोधे क्षान्दीव्यतीति प्रयोगे द्वितरमानाभावात्। कार्यकालपक्षेपि परत्वा
त्तृतीयया बाधे न्याय्ये तदनुपस्थितेरेवन्याय्यत्वात् इति एवंचाक्षैरक्षान्वेति परममूलं तदुपपादकं कार्यकालेत्यादि द्वितीयेतीसंतं मूलं तथाकैयट प्रकाशा
त्ताकराद्युक्तं चचिंत्यं। किंच कृतिचेति सूत्रे कैयटोक्तरीत्या यथोद्देशेपि प्रधानानुरोधेन गुणानां स्वात्मभेदकल्पनस्य तुल्यतयाविशिष्य कार्यकालपक्षे इत्युक्ति
रनुचिता। किंच कार्यकालपक्षे यादिभ्यःपरेव प्रगृह्य संज्ञेत्यदसो मादितिसूत्रभाष्योक्तरीत्या अपादानमुत्तराणि गांदोग्धीत्याकडारसूत्रस्थभाष्यासंगते
राकडारस्थ संज्ञानां यथोद्देशत्वमेवेति तदुक्तसंगतिरेव। तदेतद्हृदि निधायाक्षान्दीव्यतीत्यस्योपपत्तिं सिद्धांतमते नाशाक्षानिति॥ लक्षणेति॥ इद
मुपलक्षणं फलाश्रयत्व समानाधिकरण कर्मत्वविवक्षायामपि नभवतीति॥ नभवत्येवेत्यर्थः उक्तेरीतिरितिशेषः तथाचात्रविप्रतिषेधशास्त्रबलात्तृतीयैव
शक्तिद्वय बोधिका तत्फलं तुक्तमेव। अन्येभाष्याद्यनुयायिनः। ननु एकैव शक्तिः संज्ञाद्वयोपयोगिनीति मूलं तथा कैयट प्रकाश रत्नाकराद्युक्तं च चिंत्यं ॥६६॥
मादिपदानां कर्मत्वादि तत्तच्छक्तिरूपेण बोधकतया तयो र्भेदस्यैवौचित्यात्। एवंच सर्वसाधारणं कर्मत्वात्वं कर्मताशक्तिमत्वं धातूनां सकर्मकत्वमपि कर्मत्व

132

अ

शक्तिमदर्थान्वय्यर्थकत्वमिति मंजूषायां विस्तरो उक्त आह। दिव धात्वर्थे लि तथा च तस्याः संज्ञयोः समावेशार्थं चेन शक्तिद्वययोगो बोध्यते नचैवं कर्मणि ले
करणत्वशक्तेरनुक्तत्वेन तृतीयापत्तिरिति वाच्यं। अपादानमुत्तराणीत्यस्य लक्ष्ये गां दोग्धीत्यादौ तत्र कर्मणि ले पंचम्यापत्तिवारणायैव द्वयगतानेकशक्ति
मध्ये एकस्यां भिहितेह परस्यापि तद्वृत्तकार्यांगीकरणक्षतेरिति भावः एतेन करणत्वं चात्र दिवु धात्वर्थ साधकत्वं तदेवचात्र कर्मत्वं तथा च कर्मणि करणे वा प्रसत्ये
दिवू धात्वर्थ साधकत्वमुक्तमेवेति मान्योक्तं प्राचामनुरोधेनेति ध्वनितं। यत्तु प्रधानत्वं मुख्यत्वमखंडोधर्मः अत्र नगरे ऽप्रधान [illegible] हादित्वात् तदभावरूपं
चाप्रधानत्वं तृतीयावाच्यमिति तन्न राज्ञासह सेनागच्छतीत्यादौ तृतीयानापत्तेस्तद्ध्वनयन्नाहात्रेति। सूत्रेइत्यर्थः। गुणसमूहो द्रव्यमिति पतंजलमुक्त्यनुरो
धेन तंत्रान्तरस्थ द्रव्यादिक्रममुल्लंघ्य गुणाद्युक्तं आदिना द्रव्यक्रिययोः संग्रहः एवंच मूले क्रियापदं प्रकृताभिप्रायं। पुत्रेण सह पितुर्गौः पुत्रेण सह स्थूल इति तल्लक्ष्ये
। एतेन पुत्रेण सहागत इत्यादौ सहार्थ सामर्थ्यात्प्रतीयमानक्रियाकर्तृत्वेन पुत्र तृतीयासिद्धा नच तेनाभिधानं इतर समभिव्याहारं विनापि प्रतीमान स्वप्रकृत्यर्थक्रि
या कर्तुरेव तेनाभिधानात्। पुत्रेण सहागमनं पितुरित्यादावुक्तरीत्या प्रतीयमानकृत्प्रकृत्यर्थान्वयिनोः कर्तृकर्मणोरेव षष्ठी न तु तृतीयमान तदन्वयिनोः सिद्धिरिति
न दोषस्समपास्तं। उक्त लक्ष्य सिध्यर्थं सूत्रावश्यकत्वात्। उक्तेषां गमनादिभिः पितुः शाब्दः पुत्रस्य सहार्थ बलात्प्रतीयमानैस्तैः संबंधाद्यर्थः इतर संबंधं विना प्रती
यमानत्वं चार्थस्य शाब्दत्वं सहार्थश्च साहित्यं तच्चात्र समभिव्याहृतक्रियादि समान कालिक क्रियादिमत्वं तत्समभिव्याहृतमखंडोपाधि रूपं वा। तृतीयार्थश्च क्रिया
समभिव्याहारे सहार्थ बलात्प्रतीयमानतत्क्रियाकर्तृत्वादि कमेव। द्रव्यगुण समभिव्याहारे तद्बलात्प्रतीमानस्तत्सदार्थ संबंध एव एवंच पुत्रकर्तृकागमनस
मान कालिकागमनवान्पिता पुत्रस्वामिकत्वसमान कालिक पितृस्वामिकत्ववती गौः पुत्रवृत्ति स्थौल्यसमान कालिक स्थौल्यवान्स इत्यादिक्रमेण बोधः पुत्रकर्तृ
कागमन सहितागमनवानित्यादिक्रमेण वा बोधः पुत्रादेः सहार्थयोगस्यागमनादि द्वारक एव बोध्यः क्वचित्समानदेश क्रियावत्त्वरूपं तत्समभिव्याहृतं वा तदर्थः

२

यथा माषवापोऽस्तं नैव क्षेत्रे तिलवापे तिलैः सह माषानवपति स्मेति भवतीत्यादि स्पष्टं भाष्ये । तदेतद् हृदि निधायार्थमुपपादयति । ध्रुवेति । गुणक्रियाद्रव्यैर्गुण
प्रधानभावेन द्वयोः संबंधे साहित्यवाचिसहशब्दप्रयोगादिति भावः । बोध इति ॥ शाब्दे प्राथमिके इत्यर्थः । तत्र साहित्यं पुत्रसंबंधेऽन्वयितरूपं तत्समभिव्याहृतं वा तद्भि
प्रेत्याह ॥ साहित्यस्येति ॥ पुत्रेणेति । सहेति शेषः । इत्थं सय तद्धलादेवेति शेषः । तस्यापि पुत्रस्यापि स च पुत्रोऽप्यागत इत्याकारक इति भावः । नन्वेवमपि त्रास सहागतः
सुत इत्यादि तस्यादत आह ॥ शाब्दत्वं चेति ॥ तथा च सहागतौ पितापुत्राविव्यस्यापि सिद्धं । यद्वा क्रियादिसंबंधाविशेषात्कथं पितुः प्राधान्यं कथमीदृशप्राधान्य
स्येवग्रहणमत आह । शाब्दत्वं चेति । एवमिति । षष्ठी च तत्संबंधाङ्गीकारे चेत्यर्थः ॥ बुद्धिस्थेषु गुणादिघटितप्राग्युक्तलक्ष्येषु ॥ विशेषणेति । गुणाद्यन्वयितरूपविशे
ष्यस्य सत्त्वादिति भावः । उत्कटीयाऽवश्यकस्यापि सूत्रस्य सर्वथा तत्त्वं ध्वनयितुमाह ॥ सत्येवेति ॥ विद्यमानतावाचीति सकर्मक इत्यादौ तु विद्यमानवाचिसहशब्द
नानेकमिति बहुव्रीहौ कप् मूलकदाद्युक्तत्साधनप्रकारस्तु भाष्यविरुद्ध इति स्फुटीभविष्यति ॥ योगाविति पाठः । विशेष्यभावकृतीपीत्यर्थः कश्चित्तथैव पा
ठः अपितो भयाभावकृतपरिग्रहः वस्तुतस्तु शाब्दबाधाभावस्याप्येतन्मूलकत्वाद् विरहित एव पाठोऽर्थश्चायुक्त इति ध्येयमित्यर्थ इति । एवं च सूत्रे सर्वोऽपि सहशब्दो ग्र
हले विनिगमनाविरहादिति भावः । यत्तु मूलादावये विद्यमानत्वविशिष्टधर्मी अत्र सहार्थ इति तन्न । पुत्रैरिति तृतीयाया उपपदविभक्तित्वेन प्रक्ष्यपवादत्वा
संबंधमात्रार्थकत्वेन सहार्थे नानन्वयापत्तिः विद्यमानैः पुत्रैर्युक्त इत्यर्थे तु कर्तृकरणान्यतरतृतीययैव सिद्धं पुत्रेण सहेत्यः सगत इत्यादौ वैशिष्ट्यादिरूपं सा
हित्यं सहार्थः पुत्रसाहित्यवान्यः सगत इति बोध इति दिक् । तद्ग्रहान्यत्रेति ॥ उद्योतशेखरमंजूषास्विस्वर्थः । वक्ष्यमाणदोषेण यथाश्रुतमूलासंगतेराह । प्राची
नैरिति । सीरदेवादिभिरित्यर्थः । क्रियाकारकसंबंधोऽन्तरंग इति तन्निमित्ता विभक्तिरन्तरंगा उपपदार्थे ननु यत्किंचित् क्रियाकारकभावमूलकः संबंध
इति किमितास्ताबहिरंगेति तदाशयः इदमयुक्तं नमस्यति देवानित्यत्र नमःपदार्थेऽपि क्रियाकारकभावेनैवान्वयेन तत्र चतुर्थीवारणाय नमो वरिव इति सूत्र
न्न

भाष्येस्योपन्यासस्यासंगतापत्तेः अत्रनमः पदार्थस्यापि क्रियात्वं मुंडयतो मुंडस्येवात आह । वस्तुतस्त्विति । तद्विति । उपपदविभक्तेरिति प्रसिद्धवाक्यमपि स्वर्थः । एवं नोक्त आरतिः । अत एव स सप्तम्यपेक्षयाऽधिकरणसप्तम्या बलवत्त्वमनेन न्यायेन तत्रदीयत इत्यत्र भाष्ये ध्वनितं कैयटे न स्पष्टमुक्तं । एतेन क्रियान्वयित्वमत्र कारकत्वमित्यपास्तं । सप्तम्या अपि तदन्वयित्वादिति भावः एवं तर्हि मूलासंगतिरत आहान्तरंगत्वमिति । तन्न्यायोपेति ॥ तन्न्यायस्येत्यपि स्वर्थः तथाचयथाश्रुतं मूलं तथाद्दृश्यायुक्तं चचिन्त्यमेवेति भावः ननु एवमपि न प्रकृतेष्टसिद्धिः प्रथमायाः कारकाधिकारापठितत्वेनाकारकत्वादत आह । प्रथमायाश्चेति । चस्त्वर्थो भिन्नक्रमः एतन्न्यायप्रसंगे नैवेति शेषः अयंभावः क्रियाजनकार्थकविभक्तित्वं कारकविभक्तित्वं । तच्च प्रथमाया अप्यस्तीति सापि लब्धेति ध्वनितं चेदं प्रकृतसूत्रभाष्यादौ रति तदाहासन्येवेति । उद्योतादाविसूर्थः । ननु सति संभवे वचनापेक्षयांतरंगन्यायेनेष्टसिद्धिरेवोचितेति यथाश्रुतं मूलं समंजसमेवात आहांतरंगत्वेपीति । अप्रधानग्रहणाभावे स्वविषयचरितार्थ्याद्य प्रथमाया अप्यवश्यं प्राप्त्या बाध्यविशेषचिन्ता पक्षे आह तत्रेति एवंचेष्टसिध्याऽप्रधानग्रहणावश्यकत्वेन तेन खंडनमनुचितं । वचनसत्त्वे तु तेनेष्टसिध्या तदुचितमित्याहोपपदेति । चस्त्वर्थे ॥ सर्वतः अपवादेऽपि अपवादत्वात्तत्त्वमेव एवंच प्रधानेऽप्राप्त्याऽप्रधाने एव सिध्यात्तस्य तु न युक्तमिति भावः ॥ इदंचान्तरंगत्वमभ्युपेत्योक्तं वस्तुतस्त्वेदं वेत्याह । किंचोपेति । पदान्तरेति । तदर्थेत्यर्थः । एवंच तुल्यनिमित्तकत्वादेव नैमित्तिकस्वरूपमल्पनिमित्तकस्वरूपं चांतरंगत्वं तत्र बाधितं तदाह । न समिति । अंतरंगत्वमित्यर्थः प्राचीनोक्तरीत्या तत्त्वसंभवं शंकते । नचेति । संबंधस्येति । उपपदार्थेन सहेति शेषः । क्रियेति । यत्किंचित्क्रियेत्यर्थः । तत्प्रयुक्तं उपपदार्थसंबंधप्रयुक्तं तत् । विभक्तिरूपं । एतेन तुल्ययुक्त्या क्रियाकारकभावसंबंधस्यान्तरंगत्वे न तत्प्रयुक्तं कार्यं लब्धमिति रूपमन्तरंगमिति सूचितं । तथा सत्याप्तिमाह । पुत्रेणेति । अपिस्तत्रस्य पित्रृ समुच्चायकः ॥ तृतीयेत्यस्यार्थः । सति संभवे कर्त्रादितृतीयासूक्तरीत्या सिद्धेर्व सूत्रं तु दध्यादियोगसावकाशमित्युक्तमेवेति भावः । एकक्रियेति । यत्क्रिया

कर्तृत्वं पितुस्तत्क्रियेत्यर्थः तथा चान्तरंगत्वात्तत्रापि प्रथमा स्यादिति भावः प्रागुक्तभाष्यासंगतेश्चेत्यपि बोध्यं। अन्ये तु प्रधानीभूतक्रियाहेतुत्वकार्यत्वेन कारकवि
भक्तीनां प्राबल्यमिति न्यायमर्थं वदंति तन्मतं खंडयति॥ क्रियाया इति॥ यद्यप्यत्र पक्षे तत्र च दीयते नमो वरिवऽति सूत्रद्वयस्य प्रागुक्तभाष्यासंगतिरुभयोरपि क्रिया
संबंधनिमित्तकत्वादिति शेषः स्पष्टस्तथापि मूल एव कुठारमारः प्रधानेति। उक्तमिदमनुपदं तेदउति। उक्तार्थरूपमेवेत्यर्थः। नन्वन्यार्थरूपं तथा सत्यादिपदं नवदेहं
याद्यत्वाभावात्। अन्यस्येन तुल्यत्वात्। एतेन भेदेन समाधानं ब्रूते। मूलकृतः प्रथमायाः कारकविभक्तित्वं नेष्टमित्यपास्तं। तदाहुर्वेति॥ उक्तो वाक्यरत्यर्थः। ए
तेन पुत्रेण सह पितुरागमनमित्यादौ पितुस्तद्भावाय तदावश्यकमन्यथा परामपि तां बाधित्वा विशेषविहितत्वात्सैव स्यादिति प्राचोक्तमपास्तं वचनेन तस्याः
प्राबल्यात्॥ गुणाद्ययोगस्य सावकाशत्वात्। एतेनास्ति भवंतीपर इति भाष्योक्तु [illegible] आप्यस्ति क्रिया कर्तृत्वेनेदं व्यर्थं अथ शब्द संस्कारार्थ शब्द एव संबंध इष्टो

स्ता

नतार्थ इति ब्रूषे तर्हि आगत इत्यत्रापि तुल्यत्वात् सूत्रावश्यकत्वाक्षेप समाधाने निष्फले इति रत्नाकरोक्तमपास्तं। द्रव्ययोगे तथाप्यनिर्वाहात्। एतेन नवैवो
भयोस्तुल्ययोगात् पितुस्तद्भावायेतत् आवश्यकमित्यपास्तं। षष्ठीव द्विशेषणत्वे तदंगीकारात् पितुस्तत्संबंधस्यान्तरंगत्वाच्चेति दिक्। तदाहेत्यलमिति। मूले
हेतुत्वनुक्ते राह। व्याख्यानादिति॥ अंगग्रहणसामर्थ्यं मूलकृता दंगशब्दोयं समुदायशब्द इति भाष्योक्तादित्यर्थः एतदेव ध्वनयितुमाहान्यथेति। अजंतत्वाभावे इत्यर्थः
अंगशब्दस्यावयवे प्रसिद्धत्वादिति भावः। गुणेनेति॥ अनेन येन गुणेन गुणिनो विकारो लक्ष्यत इत्येतावतैव सिद्धे तदैयर्थ्यं स्पष्टमेवेति ध्वनितं अवयवस्या लक्ष

क्ष्ये

णलक्ष्यत इत्यत्र तत्स्तृतीयेति शेषः इत्यादौ हितीति॥ अक्षिशब्दादिति शेषः अजंतस्यापि यत्किंचित्सत्कृति ताद्यहार्शं आद्यजिति। यद्यप्य [illegible] वकाणं तथाप्यवय
व धर्मस्य समुदाये आरोपाद्यथा शरीरप्रयोगस्तथा तद्वच्छिन्नेपि व्यवहारस्य निरूढत्वादाह। शरीरस्यैवेति। विकारसंभवस्यासूत्रार्थत्वादाह लक्ष्य इति। अ
चेदं बोध्यं॥ द्वेविग्रा विनिव दृष्णेति प्रयोगः एवंरीत्या दृष्टानां साधुत्वे चेदमेव भाष्यमानं चक्षुर्नाशवान्त्स चक्षुष्कः काणपदार्थः अक्षिपदार्थे गोलकं नकारप्रयु

॥६८॥

त्व रूपः संबंधस्तृतीयार्थः गोत्र कविकारप्रयुक्त चक्षुर्नाशवान् सचक्षुष्क इति बोध इति केचित् ॥ अतिशायने इति सूत्रभाष्यकैयटाभ्यां तु सर्वथा दृष्टिहीनः काण इति ल
भ्यते इति बोध्यमिति । ननु सूत्रे लौकिकहेतो ग्रहणे पि तस्य करणत्वादेव सिद्धमत आह । द्रव्यादीतीति ॥ तथाचेष्ट आदिनेति । तत्फलितमाह एवं चेति । तयोस्तेन ग्रहण
मित्यर्थः ॥ साधारणमिति ॥ तज्जनकं वर्तत इत्यर्थः । ननु करणं नियतक्रियमित्यनेन बहुव्रीहिणा सव्यापारं तदर्थो लभ्यते सत्यापुक्तः । अनाश्रित इत्यनेन पौनरुक्त्या
पत्ते रत आह । क्रिययेति । तथाच वैषयिकसप्तम्यर्थे बहुव्रीहि [illegible] धनयन्नाह । क्रियामात्रेति । बहुव्रीहिः तन्मात्रजनकमित्यर्थः उत्पन्नभेद सिध्या उ
त्तरकारिकाया वैयर्थ्य माशंक्याह । इतीति । वैषम्यांतरमिति । एतेन क्रियाजनकं करणे प्यनेनैव सिद्धौ तत्र तद्विधिप्यर्थे तिआह एवं तरणं निरस्तं तत् धनयन्त
त्फलितमाह एवं चेति । करणं तु व्यापारवद् वैस्यादिभेदं चेत्यर्थः । शाब्देति ॥ शाब्दबोधवैलक्षण्यायेत्यर्थः करणत्वशालिनो हेतुत्वशालि भिन्नो वात्र तृतीयार्थ इति तात्पर्य
ननु तुल्यार्थास्तु विकल्पे इ भिति जैमिन्युक्ते बहुव्रीहिरपवादे रूढ तानुदितयोश्च विकल्पव्यवहारो दृष्टः प्रकृते तु नैवमिति कथं तदुक्तिः ॥ अन्यथा द्वितीयादेरपि
मिथस्तद्व्यवहारापत्तिरत आह । तदर्थत्वेनेत्यर्थः । तयोस्तृतीयाचतुर्थ्योः एवं च न सोत्र विकल्पः किंतु विकल्पत इत्यस्य पक्षे भवतीत्यर्थ इति भावः । फलमपीह हेतुरि
ति परमं मूलमित्थं केचिद्व्याचक्षते, इह सूत्रे फलमपि हेतुशब्देन गृह्यते तृतीयार्थश्च फलत्वेन फलं तत्र प्रकृत्यर्थस्याभेदेनान्वयः । तस्य च वासे जनकतया
एवं च । ध्ययनाभिन्नफलजनको वास इति बोध इति तदाह । तत्र फलमिति ॥ सूत्रे तेन गृह्यमाणफलं चेत्यर्थः अन्ये तु अन्यथा तत्था इह एव सूत्रे लक्ष्ये कश्चित्
फलमपि हेतुत्वेन विवक्ष्यते तस्यापि स्वज्ञानद्वारा जनकत्वात् इति तदाह । हेतुत्वेनैवेति । एवस्तद्व्यावृत्तिद्वारास्य सिद्धांतत्वसूचनाय । अत एवात्रमते बोधमा
हाध्ययनेनेति । अध्ययनाभिन्न हेतुजन्यो वास इत्यर्थः तृतीयायाम्भिन्नत्वेन संसर्ग इत्युक्तो ग्रंथो व्याख्यात इति सूचितं । अत एव तद्ग्रंथव्याख्या चतुर्थ्यामिति
उपकारकस्य तदर्थः तत्र चतेनान्वयः अध्ययननिष्ठोपकार्यतानिरूपितोपकारकत्ववान्वास इत्यर्थः । इदं च निरूपकत्वस्य संसर्गत्वकथनद्वाराविशेषकथा

[illegible] नांसिद्धांतमाह। ध्ययेति। उपकार्योपकारकभावस्तदर्थः अध्ययनरूपं यदुपकार्यं तदुपकारकीवास इत्यर्थस्तदाह। चतुर्थ्यंनेपीत्यर्थः अपिस्तु ती
यांन समुच्चायकः एवंचाविशेषइति मूलोक्तिस्तथा इंज्यायुक्तिश्चचिंत्येति बोध्यं। भेदेति। विशेष्यविशेषणेन तस्य नामार्थत्वेन द्रव्यत्वात् क्रियात्वेपि तत्स्वरूपेति भा
गार्थस्य सत्वं तथाच गम्यमानस्य श्रूयमानस्य बोधविषयइत्यर्थः स्पष्टं चेदं सहयुक्ते इत्यत्र भाष्य इति मूलाद्यभिमतं तथापि सिद्धांतरीत्या आचष्टे। श्रमेणेत्यादीति॥
वाक्येयकदेशान्यायेनेति भावः आदिना शतादिपरिग्रहः अस्यसिद्धांतत्वं ध्वनयति स्पष्टं चेदमिग्यणः इत्यत्र भाष्ये इति तत्रहि श्र विशार्पिडीमिति वाक्यार्थे वाक्येयक
देशप्रयोग इत्युक्तं तथाच विशिष्टस्यैव शक्तित्वात् एकदेशस्यापीति स्वं वाच्यक्रियां प्रतिस्वस्य करणत्वमितीदृत्यादिपरममूलार्थो बोध्यः एतेन तस्याश्र
येणेति नामार्थत्वेन न क्रियात्वमित्यपास्तमिति मंजूषायां विस्तरः तदाहेति। तादृशमगम्यमानत्वमभिधीयमानत्वमभिप्रेत्यैवाहेत्यर्थः नन्वन्यथाभिप्रेत्येति
भावः। ननु एवमपि श्रूयमाणतद्वाचकपदजबोधविषयत्व सत्वाद्विरोधो तत्राह। श्रूयमाणत्वमात्रेति। तथाच तस्य तन्मात्रावाचकत्वान्न विरोधइति
भावः ज्ञापकत्वमुपपादयति। चतुर्थ्यर्थेति। यत्तु स्तोकादयः इदं चिंत्यं अशिष्टव्यवहारइत्यंशस्य वाचनिकत्वादिति तत्खंडयति। साचेदिति॥ यद्यर्थकचे
च्छब्दवत्वादिति भावः। तस्यास्तृतीयायाः तत्सदर्थस्यस्पष्टमप्रतीतेराह। ज्ञाप्यतेइति। एतेन निपातानामनेकार्थत्वाच्चार्थे चेत् शब्दः तादृशादाणआत्मने
पदं भवति साच चतुर्थ्यर्थे बोध्या। अभिधानस्याभावात् अशिष्टव्यवहारे एव प्रयोगनियमइति हरदत्तोक्तं प्रकाशानुक्तित्वमपास्तं। एकदेशानुमति द्वारा यमर्थ
शो ज्ञाप्यत इति मान्योक्तिरपि प्राचामनुरोधेनेति बोध्यं। तदाहतेनेति। उक्तप्रकारेणेत्यर्थः। शिष्टेति। अशिष्टानां संकीर्णाचाराणां योव्यवहारः क्रियात्तद्बो
धकप्रयोगे प्रयासस्या यत्संबंधेन व्यवहारस्य संकीर्णाचारत्वं तद्वाचकात्तदर्थे सतिवार्तिकार्थः अपिरुक्तसमुच्चायकः दानपूर्वकोभागोधात्वर्थः दा
सीसंप्रदानकदानपूर्वको भोगइति बोध्यः दास्येरत्नातमुपभुंक्ते इतियावत् इति तत्त्वीया ननुस्वत्वनिवृत्ते धात्वर्थत्वेन तत्प्रसक्त्या पुनर्ग्रहणाये र

यत्राधिकृ मत एव दानं च नामकिंचिदुद्देश्यं। पुनर्ग्रहणाय स्वद्रव्यत्यागस्येव प्रकाशे उक्तमत आह स्वं चेति। प्रतीकोक्तार्थरूपं चेत्यर्थः वाच्यता दाणधातुवाच्यता
ननु भाक्तो नाम गौणः तथैव तांत्रिकव्यवहारात् स च कुत्रेत्याशंकायामाह अधीनीकरणेति। एवमपि वृत्तिकृन्मतमित्यलं मूलं तथा तदुक्तं चायुक्तमेव तच्छूद्रायेत्या
दावनिर्वाहात् तत्र धनयत्राह। नशूद्रायेति मुख्यमते कुलरूपदानासंभवादाह नीयेति। उपदेष्टत्वबोधानां तत्र मुख्यं प्रमाणमाह तएवेति। अन्वर्थ
तानाग्रहादेवेत्यर्थः ॥ क्रियेति। कर्मरहितक्रियेत्यर्थः। एवं च पत्ये शेते इत्यादावकर्मकक्रियोद्देश्यस्य संप्रदानत्वार्थं वार्तिकमिति भावः प्रत्याख्यातमिति। संदर्शना
दिक्रियाया शयनादिक्रियाया अपि सकर्मकत्वात्। तथा च पतिसंप्रदानकं दर्शनादिकर्मीभूतं पत्नीकर्तृकं शयनमिति बोध इति सूत्रेणैव तत्सिद्धिः अ
न्वर्थत्वे तु तदसंगतिः स्पष्टैवेति भावः एवं सत्यधिकमाग्रिममूलं योजति भाष्यांतरमिति। तद्व्याचष्टे। चेष्टामिति। प्रसूतकरादिकमित्यर्थः। संयोग इति
संयोगविशेषानुकूलो व्यापार इत्यर्थः। अर्थः। इति दाण इति भावः अस्यान्यथाप्युपपत्तेर्नास्य मुख्यमानत्वमिति तात्पर्यं शेषित्वं प्रधानत्वं तत्फलितमा
होद्देश्यत्वमिति। अत एवाह। शेषत्वमभिप्रेति। कर्मणा करणभूतेन यं स्वस्वामिभावादिना संबद्धुमिच्छतीति तदर्थो हीति भावः अतिश[illegible]यादि अनुकृतसंस
स्कारः। तदपि शेषित्वमपि बाधान्न संप्रदानसंज्ञाया इति शेषस्तदाह। न दोष इति॥ ननदापतिरित्यर्थः तथा च मूलं तथा तदुक्तं च चिंत्यं तदाह। ततमिति।
अत्रेदं बोध्यं संप्रदानत्वशक्तिमान् क्रियाकारकभावसंबंधश्च कारकं चतुर्थ्यर्थः सा च शक्तिः सूत्रतदुक्तार्थकर्मनिष्ठफलनिरूपकत्वेनेच्छाविषयो यस्तन्निष्ठा
उक्तसूत्रात् स एवोद्देश्य इत्युच्यते स्वत्वसुदेश्यतानिरूपकत्वं संबंधः विप्राभिन्नसंप्रदाननिष्ठोद्देश्यतानिरूपकं दानमिति बोध इति प्राञ्चः संप्रदानविप्रीयं
विप्रसंप्रदानकं वा दानमिति बोध इति नव्यामिति। तस्याभियत्र पाठादाह। तस्यदूरेति। कश्चिदिति। अचारुचिर्बीजं तु तस्याकर्मकत्वेन कर्मणि त उसंभवः
ह्राप्यमान इति साहचर्यात्तथैवोचितमिति॥ ननु भीधातोरपि रुच्यर्थत्वेन हरिर्भीणस्तीत्यत्रापि तदापत्तिरत आह। प्रीयमेति। तत एव संप्रदानत्वेन कर्मणि

लड संभवात् तदनुपपत्तेरिति भावः। अप्रादित्युराद्युभयसंग्रहायाह। प्रीधात्वर्थेति। अत्र हरीतिमिसत्र। अत्र मते ज्ञापनकल्पनागौरवमितीदं मूलं तथा रत्नाकरं ज्ञ्या
मुलं चिंत्यं तत्त्वं नयन्प्राहेति। भाव इति। अयं भावः विषयतासंबंधावच्छिन्नप्रीत्यनुकूल स्तत्समानाधिकरणो व्यापारो रूपेऽर्थः तत्फलभूतप्रीतेः समवाये
नाश्रयो हरिः संप्रदानत्वशालिमानउक्तसूत्रात्
प्रीतिर्व्यधिकरणः सोऽभिलषतेरर्थ इति तस्य तदर्थत्वाभावाद्धरिर्भक्तिमभिलष्यतीत्यादौ न हरेस्त्वं समवायसंबंधावच्छिन्नप्रीत्यनुकूलव्यापार प्रीधातोरर्थः
अतएव प्रीयमाणः हरिं प्रीणयतीत्यादिसिद्धिः एतद्भावे हरौ शेषषष्ठी प्राप्तेति तदपवादत्वमस्या प्रकाशो पीत्थं हरिनिष्ठाया भक्तिः विषया प्रीतिस्तदनुकूलो
भक्तिनिष्ठो व्यापार इति बोध इति एतेनात्रपक्षे क्रियया यमभिप्रैति स संप्रदानमिति सूत्रवैयर्थ्यापत्तिरिति [illegible] निरस्ता करोत्क्रमपास्तं। तस्या अपि
कारकविभक्तित्वेन तदविवक्षायां शेषत्वे तेन विधानादिति दिक्। तद्भावे प्रीयमाणपदाभावो शेष हेति। क्रियाजनकत्वमात्रविवक्षायां संज्ञांतरा प्राप्तिविष
य इत्यर्थः। तयाधिकरणसंज्ञया बाध एतत्प्रयोगस्याप्यापत्तेरित्यर्थः अपि रक्तप्रयोगसमुच्चायकः। यद्वा अपि यथा तस्य समुच्चायकः कर्मसंज्ञाया अपि
प्रसक्ता सूत्रस्य निर्विषयतापत्तेरित्यर्थः न त्वेतस्य कर्मसंज्ञापवादत्वात् दोष इति मूलतात्पर्यं सिद्धांतरीत्या तु प्राप्तिरेवेति बोध्यं। स्तुत्यादिमात्रार्थत्वे कृ
ष्णं श्लाघते इत्यादि प्रयोगाणामिष्टत्वादाह। स्तुत्येति॥ तत्पूर्विका बोधना धात्वर्थः स्तुतिश्च कृष्णस्यैव। सा च गुणवत्त्वेति पादक शब्दप्रयोगादिः स्मर। दिति
हेतौ पंचमी। परस्मै सखीजनाय कृष्णं कथयतीति। आत्मानुरागं कृष्णं बोधयतीत्यर्थः अत्र ज्ञापनवचनात् ज्ञपेः सन्नंता कर्मणि शानच्। तेन च यदि विषयक
तानानुकूलव्यापारानुकूलव्यापारः संगृह्यत इति केचित्। तदाशयमाह। शीप्स्यति। प्रथमोपस्थितत्वात् अंतरंगत्वात्। तथा च गोपीकर्तृक सखीजनो ॥७०॥
द्देश्यकं स्तुतिपूर्वकं स्वात्मानुराग कृष्णकर्मक बोधनमिति बोधः अत्र पक्षे कर्मत्वं चतुर्थ्यर्थः एवं नण्यर्थ कर्मनिरूक्तिः। ननु शीप्स्यमानपदेन तस्यैव ग्रहणमु

चितमत आह। तस्यापीति। णिच प्रकृत्यर्थ कर्मणोपीत्यर्थः विशिष्टस्येच्छाविषयत्वे विशेषणस्यापि तत्त्वादिति भावः अपि स्वाघ्रसमुच्चायकः नन्वत्र मते णिज
निष्फलः जिज्ञास्यमानस्येव सुवचत्वादत आह। अन्येत्विति। तदुपपादयति। प्राधान्यादिति॥ ण्यर्थस्य प्राधान्यादित्यर्थः। एवेन तत्प्रकृत्यर्थ कर्मनिरस्तिः तु
दाशयः अन्ये त्विति मताशयः अत्र पक्षेपि स एव धात्वर्थः। तथा च गोपी कर्तृकं स्मरहेतुकं कृष्णसंप्रदानकमात्मपरान्यतरस्तुतिविषयकं बोधनमिति वाक्यार्थः
आत्मनः परस्य वेति प्रकरणादिगम्यं तदभिप्रायेणाह। तदेवाह कृष्णायेतीति। तथा च मूलोक्तिः फलितार्थ इति भावः। नन्वत्र पक्षे कर्मणायमिति संप्रदानत्वंसि
द्धमत आह। कारकशेषत्वादिति। तस्याश्चेष्ट कर्मणेति। अन्यथात्रापि कर्मत्वे प्राप्ते इत्येव वाच्ये तथात्विरसंगतेति भावः एतेन कर्मताविवक्षमात्र [illegible] पक्षादि
न ति मूल व्याख्यानमपास्तं। शिष्टत्वादिति कारकस्यादिः वस्तुस्त्वत्र पक्षे णिजर्थ साफल्यमिति सनो वैयर्थ्यं ज्ञाप्यमानस्येव सिद्धेः तस्मात्प्राधान्यात् [illegible] स्वारस्याच्चोभ
योरपि ग्रहणमिष्टं द्वितीयपक्षोक्त एवार्थः आत्मपरान्यतर कर्मक स्तुत्या कृष्णं स्वसखीजनं वा बोधयतीति यावत् कर्मसंज्ञापवादत्वादुभयत्रापि कर्मत्वे प्राप्ते
इदमेवमग्रेपीति बोध्यं। विस्तरस्तु घोतादौ बोध्यः अत एवारुचिसूचकमन्ये त्वित्युक्तं मूले। मूलोक्तार्थस्य शब्दादलाभादाह। तत्रेति। तदर्थबोधकवाक्ये इत्यर्थः
अग्रिमस्य शाद्धत्वं सूचयितुं तमेवार्थमिमस्यार्थ घटितमाह। स्वामीति। इत्यादिः। मूलव्याख्यानत्वादाह। एवंशपत इति। शपथेन कृष्णं वा स्वानुरागं बोध
यतीत्यर्थ इति भावः। अत्र प्रकाशादि ग्रंथा अयुक्ता एवेति बोध्यं ननु तत्र परत्वात्कर्मत्वे कथमेतत्सिद्धिरत आह। स्पृहणीय इति। स्पृहणीयशब्द इत्यर्थः शेषषष्ठ्य
पवादत्वात्संप्रदानत्वस्य शेषत्वविवक्षादुष्प्रेति मूलमतेन आह। कर्मण इति। शेषत्वविवक्षायामिति। विषयत्वादत्ता संप्रदानत्वस्य शेषत्वविवक्षादुष्प्रेति मूल
मतेन आह। कर्मण इति। शेषत्व[illegible]क्षायामिति। विषयत्व या क्रियाजनकत्व म अजनकत्व मात्रविवक्षायामित्यर्थः। गेत्राएलन्मते। अत्रेदं तत्वं। स्पृहिरिच्छामात्रवाची
फलावच्छिन्नेच्छावाची च आद्येनेन संप्रदानत्वमत्रेप्सितत्वं धात्वर्थव्यापारजन्यफलाश्रयत्व ननु फलस्य धात्वर्थत्वाग्रहः अंते कर्मत्वं तच्च धात्वर्थफलाश्रय

स्येत्युक्तं शेषषष्ठ्यपवाद एतत्संप्रदानविभक्तिः पुष्पसंप्रदानके देवेति तत्र बोधः कर्मण एव संप्रदानस्यापि तत्त्वेनाविवक्षायां षष्ठ्येवेति। तत्रविधायकाभावादाह।
बाधितेति। षष्ठ्यपवादत्वादिति। एतत्संप्रदानविभक्तेरिति शेषः अभिमानइति। सूचितासु चिस्तु तत्रापि क्रियासंबंधीत्वमात्रविवक्षासंभवइति। एतेन पूर्वमते
क्रियया यमभिप्रैति तेनैव सिद्धे सूत्रं व्यर्थं एवं चोत्तरमतमेवयुक्तं मतएव हरइत्यादौ रुचिबोधकं मूले उक्तमिति रत्नाकरदंड्यायुक्तमपास्तं। तस्यासार्वत्रिकत्वात् अ
तएव घटं करोतीत्यादौ नदोषः इदमपि सूत्रं नत्र ज्ञापकं। तस्य प्रत्याख्यानाच्च। विषयतयाक्रियाजनकत्वमात्रविवक्षायामेतत्सत्त्वेऽपि धात्वर्थस्य इच्छाविषयता
भावाच्चेति। दिर्ह। अमर्षस्य साधारण्यादाह। वागिति। असूयेति। असंते स्मार्थः। अपकारस्यापि तथात्वादापति। असहनस्यापि तथात्वादाह। हर्षेति। गुणेति
विषयसमीपादाह। गुणविषयइति। शौचाचारादिगुणविषय इत्यर्थः। दोषत्वारोपानुकूल इति। दंभादिरूपत्वरूपदोषत्वारोपानुकूल इत्यर्थः। क्रोधजन्यस्येति
तादृशकोपरूपक्रोधजन्यस्येत्यर्थः इदं तादृशद्रोहजन्यस्याप्युपलक्षणं फलस्य वधदुःखादेः। तस्य उक्तफलस्यासंज्ञादिनातद्ग्राहित्वाह। तद्दुर्योजीति। अत्रे
दं बोध्यं। हरिसंप्रदानकः क्रोधो द्रोहइति बोधः हरिसंप्रदानको दुःखविरोधीत्यादि क्रमेण तत्र बोधः हरे क्रोधद्रोहाभ्यामिच्छाविषयत्वाभावात्। क्रिययामभिप्रेते
नसिद्धिः एतेन तेनैव सिद्धे क्रुधद्रुहोर्ग्रहणं चिंत्यं भाष्यमतेतु सूत्रमेवेति रत्नाकरदंड्यायुक्तमपास्तं तस्य कुपितः कुध्यतीमाप्येण प्ररूढतादृशकोपस्यैव
क्रोधत्वेनाभनेन कुपेरतदर्थत्वे न तत्प्रयोगइदं। कुप्यति कस्मैचिद्दिया पसा ध्येव। एतेन तं इंगीकुवंदंडीभरास्तः एतेचेतनविषयाएवाहिंषिस्तत्वेनविषया
पि औषधं द्वेष्टीति प्रयोगात्। अनभिधानादित्यर्थः। अतएव चित्तदोषार्थानामिसेव नोक्तेति नयोस्मान्द्वेष्टीत्यादो मानेति। प्रश्नविषयेति। प्रश्नविषयशुभा
शुभपर्यालोचनमित्यर्थः पर्यालोचनं चाप्रातभंगानुकूलो व्यापारः प्रश्नविषयस्य कर्मणो धात्वर्थेनोपसंग्रहादकर्मकत्वतो। अतएव इयन् राधोऽकर्मकादि
त्युक्तेः धात्वर्थेत्यादेरेशेप्रश्नविषये कृष्णस्यानयः कृष्णसंप्रदानकमर्था कृष्णसंबंधि प्रश्नविषयशुभाशुभपर्यालोचनमिति बोधः। तत्रेति। तत्सापेक्षसतीत्यर्थः।

प्राप्तिरिति कृष्णस्येति शेषः एवंच कर्मत्वे प्राप्तेरदमिति वाच्यं नतु षष्ठ्यां प्राप्तायामिति भावः । तस्य प्रश्न विषयरूप फलस्य प्रयोज्यत्वेनेति ।। साक्षात्परंपरया
वा प्रधानीभूत प्रकृत धात्वर्थव्यापाराजन्यत्वेनेत्यर्थः बहिस्शुभादिकं प्रागुक्त गारुडव्यापारजन्यमिति भावः । तत्प्राप्तिरिति । कर्मत्वाप्राप्तिरित्यर्थः । होतरि
साक्षात्फलाश्रयत्वाभावात् कर्मत्व प्राप्तिमुपपादयति । शंसितुरिति । शंसिता होता तत्कर्तृकं यच्छंसनं शस्त्राख्यसूक्तादिनेन्द्रादिनिष्ठगुणाभिधानं तद्विष
